# वेद मन्त्राः

# *Veda Mantras*

DEVANĀGARĪ & RCCS

Vol. 5

www.sanskritveda.net
www.vedavishwa.com

[KYV TA Prapāṭhakaḥa 1]

[१-०-०] [1-0-0]

ॐ भ॒द्रं कर्णे॑भिः शृणु॒याम॑ दे॒वाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः ।

ॐ bhad’raṅ’ kar’ṇēbhiś’ śhṛṇuyāma dēvā-ḥa ।

bhad’ram’ paś’yēmāk’ṣhabhir’yajat’rā-ḥa ।

स्थि॒रैरङ्गै᳚स्तुष्टु॒वाꣳस॑स्त॒नूभिः॑ । व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ।

sthirairaṅ’gaiīs’tuṣh’ṭuvāgm’sas’tanūbhiḥi ।

vyaśhēma dēvahitañ’ yadāyuḥu ।

स्व॒स्ति न॒ , इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः ।

svas’ti na , in’drō vṛd’dhaś’ravā-ḥa ।

svas’ti na[fp]’ pūṣhā viś’vavēdā-ḥa ।

स्व॒स्तिन॒स्तार्क्ष्यो॒ , अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ।

svas’tinas’tārk’ṣhyō , ariṣh’ṭanēmiḥi ।

svas’ti nō bṛhas’patir’dadhātu ।

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

ॐ śhā-n’tiś’ śhā-n’tiś’ śhā-n’tiḥi ॥

[१-१-१] [1-1-1]

ॐ भ॒द्रं कर्णे॑भिः शृणु॒याम॑ दे॒वाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः ।

ॐ bhad’raṅ’ kar’ṇēbhiś’ śhṛṇuyāma dēvā-ḥa ।

bhad’ram’ paś’yēmāk’ṣhabhir’yajat’rā-ḥa ।

स्थि॒रैरङ्गै᳚स्तुष्टु॒वाꣳस॑स्त॒नूभिः॑ । व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ।

sthirairaṅ’gaiīs’tuṣh’ṭuvāgm’sas’tanūbhiḥi ।

vyaśhēma dēvahitañ’ yadāyuḥu ।

www.vedavishwa.com

स्वस्ति न , इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।

svas'ti na , in'drō vṛd'dhaśh'ravā-ḥa I

svas'ti na[fp]' pūṣhā viśh'vavēdā-ḥa I

स्वस्तिनस्ताक्ष्यों , अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।

svas'tinas'tārk'ṣhyō , ariṣh'ṭanēmiḥi I

svas'ti nō bṛhas'patir'dadhātu I

आपमापामपः सर्वाः । अस्मादस्मादितोऽमुतः ॥ १ ॥

āpamāpāmapas' sar'vāāḥa I

as'mādas'māditō (a)mutaḥa II 1 II

[१-१-२] [1-1-2]

अग्निर्वायुश्च सूर्यश्च । सह संचस्करर्द्धिया । वाय्वश्वा रश्मिपतयः ।

ag'nir'vāyuśh'cha sūr'yaśh'cha I

saha sañ'chas'karard'dhiyā I

vāy'vaśh'vā raśh'mipatayaḥa I

मरीच्यात्मानो , अद्रुहः । देवीर्भुवनसूवरीः । पुत्रवत्वाय मे सुत ।

marīich'yāt'mānō , ad'ruhaḥa I

dēvīr'bhuvanasūvarī-ḥi I put'ravat'vāya mē suta I

महानाम्नीर्महामानाः । महसो महसस्स्वः ।

mahānām'nīr'mahāmānā-ḥa I mahasō mahasas'svaḥa I

देवीः पर्जन्यसूवरीः । पुत्रवत्वाय मे सुत ॥ २ ॥

dēvī[fp]' par'jan'yasūvarī-ḥi I put'ravat'vāya mē suta II 2 II

[१-१-३] [1-1-3]

अपाश्न्युष्णिमपा रक्षः । अपाश्न्युष्णिमपारघम् ।

apāśh'nyuṣh'ṇimapā rak'ṣhaḥa I

apāśh'nyuṣh'ṇimapāragham'm I



www.vedaviswa.com

अपाघ्रामप चावर्तिमम् । अपदेवीरितो हित ।

apaāgh'rāmapa chāvar'tim'm । apadēvīritō hita ।

वज्रं देवीरजीताङ्श्च । भुवनं देवसूवरीः ।

vaj'ran' dēvīrajītāgeśh'cha । bhuvanan' dēvasūvarī-ḥi ।

आदित्यानदितिं देवीम् । योनिनोर्ध्वमुदीषत ।

ādit'yānaditin' dēvīm । yōninōrdh'vamudīṣhata ।

शिवानश्शन्तमा भवन्तु । दिव्या , आप , ओषधयः ।

śhivānaśh'śhan'tamā bhavan'tu ।

div'yā , āpa , ōṣhadhayaḥa ।

सुमृडीका सरस्वती । मा ते व्योम संदृशि ॥ ३ ॥

sumṛḍīkā saras'vatī । mā tēv' vyōma san'dṛśhi ॥ 3 ॥

[१-२-१] [1-2-1]

स्मृतिः प्रत्यक्षमैतिह्यम् । अनुमानश्चतुष्टयम् ।

smṛti[fp]' prat'yak'ṣhamaitih'yam'm ।

anumānaśh'chatuṣh'ṭayam ।

एतैरादित्यमण्डलम् । सर्वैरेव विधास्यते ।

ētairādit'yaman'ḍalam । sar'vairēva vidhāās'yatē ।

सूर्यो मरीचिमादत्ते । सर्वस्माद्भुवनादधि ।

sūr'yō marīchimādat'tē । sar'vas'māād'bhuvanādadhi ।

तस्याः पाकविशेषेण । स्मृतं कालविशेषणम् ।

tas'yā[fp]' pākaviśhēṣhēṇa । smṛtan' kālaviśhēṣhaṇam ।

नदीव प्रभवात्काचित् । अक्षय्यात्स्यन्दते यथा ॥ ४ ॥

nadīvap' prabhavāt'kāchite ।

ak'ṣhay'yāāt'syan'datē yathā ॥ 4 ॥

[१-२-२] [1-2-2]

तान्नद्योऽभिसंमायन्ति । सोरुस्सती न निवर्तते ।

tān’nad’yō (a)bhisamāyan’ti । sōrus’satī na nivar’tatē ।

एवन्नानासमुत्थानाः । कालास्संवत्सरङ्ग् श्रिताः ।

ēvan’nānāsamut’thānā-ḥa ।

kālās’sam̐’vat’sarag’geśh’ śhritā-ḥa ।

अणुशश्च महशश्च । सर्वे समवयन्त्रितम् ।

aṇuśhaśh’cha mahaśhaśh’cha । sar’vē samavayan’tritam ।

सतैस्सर्वैस्समाविष्टः । ऊरुस्सन्न निवर्तते ।

sataiīs’sar’vais’samāvish’ṭaḥa । ūrus’san’na nivar’tatē ।

अधिसंवत्सरं विद्यात् । तदेव लक्षणे ॥ ५ ॥

adhisam̐’vat’saram̐’ vid’yā-te । tadēva lak’shaṇē ॥ 5 ॥

[१-२-३] [1-2-3]

अणुभिश्च महद्भिश्च । समारूढः प्रदृश्यते । संवत्सरः प्रत्यक्षेण ।

aṇubhiśh’cha mahad’bhiśh’cha ।

samārūḍha[fp]’ pradṛśh’yatē ।

sam̐’vat’sara[fp]’ prat’yak’shēṇa ।

नाधिसत्त्वः प्रदृश्यते । पटरो विक्लिधः पिङ्गः । एतद्वरुणलक्षणम् ।

nādhisat’tva[fp]’ pradṛśh’yatē ।

paṭarō vik’lidha[fp]’ pin̐’gaḥa । ētad’varuṇalak’ṣhaṇam ।

यत्रैतदुपदृश्यते । सहस्रं तत्र नीयते । एकꣳहि शिरो नाना मुखे ।

yat’raitadupadṛśh’yatē । sahas’ran’ tat’ra nīyatē ।

ēkagm’hi śhirō nānā mukhē ।



www.salvedaneti.com www.vedavishwa.com

कृत्स्नं तद्दतुलक्षणम् ॥ ६ ॥
kṛt'snan' tadṛtulak'ṣhaṇam ॥ 6 ॥
[१-२-४] [1-2-4]

उभयतस्सप्तेन्द्रियाणि । जल्पितं त्वेव दिह्यते ।
ubhayatas'sap'tēēn'driyāṇi । jal'pitan' tvēva dih'yatē ।

शुक्लकृष्णे संवत्सरस्य । दक्षिणवामयोः पार्श्वयोः ।
śhuk'lakṛṣh'ṇē saṁ'vat'saras'ya ।
dak'ṣhiṇavāmayō[fp]' pār'śhvayō-ḥo ।

तस्यैषा भवति । शुक्रं ते , अन्यद्यजतं ते , अन्यत् ।
tas'yaiṣhā bhavati ।
śhuk'ran' tē , an'yad'yajatan' tē , an'yate ।

विषुरूपे , अहनी द्यौरिवासि । विश्वा हि माया , अवसि स्वधावः ।
viṣhurūpē , ahanīd' dyaurivāsi ।
viśh'vā hi māyā , avasis' svadhāvaḥa ।

भद्रा ते पूषन्निह रातिरस्त्विति । नात्र भुवनम् । न पूषा । न पशवः ।
bhad'rā tē pūṣhan'niha rātiras'tviti । nāt'ra bhuvanam ।
na pūṣhā । na paśhavaḥa ।

नादित्यस्संवत्सर , एव प्रत्यक्षेण प्रियतमं विद्यात् ।
एतद्वै संवत्सरस्य प्रियतमꣳ रूपम् ।
nādit'yas'saṁ'vat'sara , ēvap' prat'yak'ṣhēṇap'
priyatamaṁ' vid'yā-te ।
ētad'vai saṁ'vat'saras'yap' priyatamagm' rūpam ।

www.vedavishwa.com

योऽस्य महानर्थ , उत्पतस्यमानो भवति । इदं पुण्यं कुरुष्वेति ।
तमाहरणं दद्यात् ॥ ७ ॥

yō (a)s'ya mahānar'tha , ut'pat'syamānō bhavati ।
idam' puṇ'yaṅ' kuruṣh'vēti ।
tamāharaṇan' dad'yā-te ॥ 7 ॥

[१-३-१] [1-3-1]

साकंजानाꣳ सप्तथमाहुरेकजम् । षडुद्यमा , ऋषयो देवजा , इति ।

sākañ'jānāgm' sap'tathamāhurēkajam ।
ṣhaḍud'yamā , ṛṣhayō dēvajā , iti ।

तेषामिष्टानि विहितानि धामशः । स्थात्रे रेजन्ते विकृतानि रूपशः ।

tēṣhāmiṣh'ṭāni vihitāni dhāmaśhaḥa ।
sthāt'rē rējan'tē vikṛtāni rūpaśhaḥa ।

को नु मर्या , अमिथितः । सखा सखायमब्रवीत् ।

kō nu mar'yā , amithitaḥa । sakhā sakhāyamab'ravī-te ।

जहाको , अस्मदीषते । यस्तित्याज सखिविदꣳ सखायम् ।

jahākō , as'madīṣhatē ।
yas'tit'yāja sakhividagm' sakhāyam ।

न तस्य वाच्यपि भागो , अस्ति । यदीꣳ श्रृणोत्यलकꣳ श्रृणोति ॥ ८ ॥

na tas'ya vāch'yapi bhāgō , as'ti ।
yadīgm' śhṛṇōt'yalakagm' śhṛṇōti ॥ 8 ॥

[१-३-२] [1-3-2]

न हि प्रवेद सुकृतस्य पन्थामिति । ऋतुरृतुना नुद्यमानः ।

na hip' pravēda sukṛtas'ya pan'thāmiti ।
ṛtur'ṛtunā nud'yamānaḥa ।

विन॑नादा॒भिधा॑वः । षष्टिश्च त्रिंश॒का॑ व॒ल्गाः ।
vinanādābhidhāvaḥa ।
ṣhaṣh’ṭiśh’chat’ trigm’śhakā val’gā-ḥa ।
शु॒क्लकृ॑ष्णौ च॒ षाष्टि॑कौ । सा॒रा॒ग॒व॒स्त्रैर्ज॒रद॑क्षः ।
śhuk’lakṛṣh’ṇau cha ṣhāṣh’ṭikau ।
sārāgavas’trair’jaradak’ṣhaḥa ।
व॒स॒न्तो व॒सु॑भिस्स॒ह । सं॒व॒त्स॒रस्य॑ स॒वि॒तुः ।
vasan’tō vasubhis’saha । saṁ’vat’saras’ya savituḥu ।
प्रै॒ष॒कृत्प्र॑थ॒मः स्मृ॑तः । अ॒मू॒ना॒दय॑ते॒त्य॒न्या॒न् ॥ ९ ॥
praiṣhakṛt’prathamas’ smṛtaḥa ।
amūnādayatēt’yan’yā-ne ॥ 9 ॥
[१-३-३] [1-3-3]
अ॒मूंश्च॑ परि॒रक्ष॑तः । ए॒ता वा॒चः प्र॑यु॒ज्य॒न्ते ।
amūgeśh’cha parirak’ṣhataḥa ।
ētā vācha[fp]’ prayuj’yan’tē ।
य॒त्रैत॑दुप॒दृश्य॑ते । ए॒तदे॒व वि॑जा॒नी॒यात् ।
yat’raitadupadṛśh’yatē । ētadēva vijānīyā-te ।
प्र॒मा॒णं॑ का॒ल॒प॒र्य॑ये । वि॒शे॒ष॒णं तु व॒क्ष्या॒मः ।
pramāṇaṅ’ kālapar’yayē । viśhēṣhaṇan’ tu vak’ṣhyāmaḥa ।
ऋ॒तू॒ना॑ँ तन्नि॒बोध॑त । शु॒क्लवा॑सा रु॒द्र॒गणः ।
ṛtūnāan’ tan’nibōdhata । śhuk’lavāsā rud’ragaṇaḥa ।
ग्री॒ष्मेणा॑ऽऽव॒र्त॒ते स॒ह । नि॒ज॒ह॒न्पृ॒थि॒वीं स॒र्वा॒म् ॥ १० ॥
grīṣh’mēṇā (ā)var’tatē saha ।
nijahan’pṛthivīgm’ sar’vām ॥ 10 ॥

www.sanskritweb.net / www.vedavishwa.com

[१-३-४] [1-3-4]

ज्योतिषाऽप्रतिख्येन सः । विश्वरूपाणि वासाꣳसि ।

jyōtiṣhāā (a)p'ratikh'yēna saha | viśh'varūpāṇi vāsāgm'si |

आदित्यानां निबोधत । संवत्सरीणं कर्मफलम् ।

ādit'yānāān' nibōdhata | saṁ'vat'sarīṇaṅ' kar'maphalam |

वर्षाभिर्ददताꣳ सह । अदुःखो दुःखचक्षुरिव ।

var'ṣhābhir'dadatāgm' saha |

adu[hk]'khō du[hk]'khachak'ṣhuriva |

तद्मा पीत , इव दृश्यते । शीतेनाव्यथयन्निव ।

tad'mā pīta , iva dṛśh'yatē | śhītēnāāv'yathayan'niva |

रुरुदक्ष , इव दृश्यते । ह्लादयते ज्वलतश्चैव ।

rurudak'ṣha , iva dṛśh'yatē |

hlādayatēēj' jvalataśh'chaiva |

शाम्यतश्चास्य चक्षुषी । या वै प्रजा भ्रꣳश्यन्ते ।

śhām'yataśh'chās'ya chak'ṣhuṣhī |

yā vaip' prajāb' bhrag'geśh'yan'tē |

संवत्सरात्ता भ्रꣳश्यन्ते । याः प्रतितिष्ठन्ति ।

saṁ'vat'sarāt'tāb' bhrag'geśh'yan'tē |

yā[fp]' pratitiṣh'ṭhan'ti |

संवत्सरे ताः प्रतितिष्ठन्ति । वर्षाभ्य , इत्यर्थः ॥ ११ ॥

saṁ'vat'sarē tā[fp]' pratitiṣh'ṭhan'ti |

var'ṣhābh'ya , it'yar'thaha || 11 ||

www.sanskritweb / www.vedavishwa.com

[१-४-१] [1-4-1]

अक्षिदुःखोत्थितस्यैव । विप्रसन्ने कनीनिके ।

ak’ṣhidu[hk]’khōt’thitas’yaiva | vip’rasan’nē kanīnikē |

आङ्क्ते चाद्गणं नास्ति । ऋभूणां तन्निबोधत ।

āṅ’ktē chād’gaṇan’ nās’ti | ṛbhūṇāān’ tan’nibōdhata |

कनकाभानि वासाꣳसि । अहतानि निबोधत ।

kanakābhāni vāsāgm’si | ahatāni nibōdhata |

अन्नमश्नीत मृज्मीत । अहं वो जीवनप्रदः ।

an’namaśh’nīta mṛj’mīta | ahaṁ’ vō jīvanap’radaḥa |

एता वाचः प्रयुज्यन्ते । शरद्यत्रोपदृश्यते ॥ १२ ॥

ētā vācha[fp]’ prayuj’yan’tē |

śharad’yat’rōpadṛśh’yatē || 12 ||

[१-४-२] [1-4-2]

अभिधून्वन्तोऽभिघ्नन्त , इव । वातवन्तो मरुद्गणाः ।

abhidhūn’van’tō (a)bhigh’nan’ta , iva |

vātavan’tō marud’gaṇā-ḥa |

अमुतो जेतुमिषुमुखमिव । सन्नद्धास्सह ददृशे ह ।

amutō jētumiṣhumukhamiva |

san’nad’dhās’saha dadṛśhē ha |

अपध्वस्तैर्वस्तिवर्णैरिव । विशिखासः कपर्दिनः ।

apadh’vas’tair’vas’tivar’ṇairiva |

viśhikhāsa[hk]’ kapar’dinaḥa |

अक्रुद्धस्य योत्स्यमानस्य । क्रुद्धस्येव लोहिनी ।

ak’rud’dhas’ya yōt’syamānas’ya | krud’dhas’yēva lōhinī |

www.vedavishwa.com

हेमतश्चक्षुषी विद्यात् । अक्षणयोः क्षिपणोरिव ॥ १३ ॥

hēmataśh'chak'ṣhuṣhī vid'yā-te |

ak'ṣhṇayōōḥo , kṣhipaṇōriva || 13 ||

[१-४-३] [1-4-3]

दुर्भिक्षं देवलोकेषु । मनूनामुदकं गृहे ।

dur'bhik'ṣhan' dēvalōkēṣhu | manūnāmudakan' gṛhē |

एता वाचः प्रवदन्तीः । वैद्युतो यान्ति शैशिरीः ।

ētā vācha[fp]' pravadan'tī-ḥi |

vaid'yutō yān'ti śhaiśhirī-ḥi |

ता , अग्निः पवमाना , अन्वैक्षत । इह जीविकामपरिपश्यन्न् ।

tā , ag'ni[fp]' pavamānā , an'vaiīk'ṣhata |

iha jīvikāmaparipaśh'yan'ne |

तस्यैषा भवति । इहेह वस्स्वतपसः ।

tas'yaiṣhā bhavati | ihēha vas'svatapasaḥa |

मरुतस्सूर्यत्वचः । शर्म सप्रथा , आवृणे ॥ १४ ॥

marutas'sūr'yat'vachaḥa | śhar'ma sap'rathā , āvṛṇē || 14 ||

[१-५-१] [1-5-1]

अतिताम्राणि वासाꣳसि । अष्टिवज्रिशतघ्नि च ।

atitām'rāṇi vāsāgm'si | aṣh'ṭivaj'riśhatagh'ni cha |

विश्वे देवा विप्रहरन्ति । अग्निजिह्वा , असश्चत ।

viśh'vē dēvā vip'raharan'ti | ag'nijih'vā , asaśh'chata |

नैव देवो न मर्त्यः । न राजा वरुणो विभुः ।

naiva dēvō na mar'tyaḥa | na rājā varuṇō vibhuḥu |



www.saiveda.net www.vedavishwa.com

नाग्निर्नेन्द्रो न पवमानः । मातृक्कच्चन विद्यते ।
nāg’nir’nēn’drō na pavamānaḥa ।
mātṛk’kat’chana vid’yatē ।
दिव्यस्यैका धनुरार्त्निः । पृथिव्यामपरा श्रिता ॥ १५ ॥
div’yas’yaikā dhanurārt’niḥi ।
pṛthiv’yāmaparāśh’ śhritā ॥ 15 ॥
[१-५-२] [1-5-2]
तस्येन्द्रो वम्रिरूपेण । धनुर्ज्यामछिनत्स्वयम् ।
tas’yēn’drō vam’rirūpēṇa । dhanur’jyāmachhinat’svayam ।
तदिन्द्रधनुरित्यज्यम् । अभ्रवर्णेषु चक्षते ।
tadin’dradhanurit’yaj’yam । abh’ravar’ṇēṣhu chak’ṣhatē ।
एतदेव शंयोर्बार्हस्पत्यस्य । एतद्रुद्रस्य धनुः ।
ētadēva śhañ’yōr’bār’has’pat’yas’ya ।
ētad’rud’ras’ya dhanuḥu ।
रुद्रस्य त्वेव धनुरार्त्निः । शिर , उत्पिपेष ।
rud’ras’yat’ tvēva dhanurārt’niḥi । śhira , ut’pipēṣha ।
स प्रवर्ग्योऽभवत् । तस्माद्यस्सप्रवर्ग्येण यज्ञेन यजते ।
sap’ pravar’gyō (a)bhavate ।
tas’mād’yas’sap’ravar’gyēṇa yaj’ñēna yajatē ।
रुद्रस्य स शिरः प्रतिदधाति । नैनꣳ रुद्र , आरुको भवति ।
य , एवं वेद ॥ १६ ॥
rud’ras’ya sa śhira[fp]’ pratidadhāti ।
nainagm’ rud’ra , ārukō bhavati । ya , ēvaṁ’ vēda ॥ 16 ॥

www.saiveda.net www.vedavishwa.com

[१-६-१] [1-6-1]

अत्यूर्ध्वाक्षोऽतिरश्चात् । शिशिरः प्रदृश्यते । नैव रूपं न वासाꣳसि ।

at'yūrdh'vāk'ṣhō (a)tiraśh'chā-te ।
śhiśhira[fp]' pradṛśh'yatē ।
naiva rūpan' na vāsāgm'si ।

न चक्षुः प्रतिदृश्यते । अन्योन्यं तु न हिꣳस्रातः । सतस्तद्देवलक्षणम् ।

na chak'ṣhu[fp]' pratidṛśh'yatē ।
an'yōn'yan' tu na hig'ges'rātaḥa ।
satas'tad'dēvalak'ṣhaṇam ।

लोहितोऽक्षिण शारशीर्ष्णिः । सूर्यस्योदयनं प्रति ।

lōhitō (a)k'ṣhṇi śhāraśhīr'ṣhṇiḥi ।
sūr'yas'yōdayanam' prati ।

त्वं करोषिन्यञ्जलिकाम् । त्वं करोषि निजानुकाम् ॥ १७ ॥

tvaṅ' karōṣhin'yañ'jalikām ।
tvaṅ' karōṣhi nijānukām ॥ 17 ॥

[१-६-२] [1-6-2]

निजानुका मेन्यञ्जलिका । अमी वाचमुपासतामिति ।

nijānukā mēēn'yañ'jalikā । amī vāchamupāsatāmiti ।

तस्मै सर्व , ऋतवो नमन्ते । मर्यादाकरत्वात्प्रपुरोधाम् ।

tas'mai sar'va , ṛtavō naman'tē ।
mar'yādākarat'vāt'prapurōdhām ।

ब्राम्हणं , आप्नोति । य , एवं वेद ।

brām'haṇa , āp'nōti । ya , ēvaṁ' vēda ।


www.sanatanaveda.net www.vedavishwa.com

स खलु संवत्सर , एतैस्सेनानीभिस्सह । इन्द्राय सर्वान्कामानभिवहति ।

sa khalu saṁ'vat'sara , ētais'sēnānībhis'saha ।

in'drāya sar'vān'kāmānabhivahati ।

स द्रप्सः । तस्यैषा भवति ॥ १८ ॥

sad' drap'saḥa । tas'yaiṣhā bhavati ॥ 18 ॥

[१-६-३] [1-6-3]

अवद्रप्सो , अंशुमतीमतिष्ठत् । इयानः कृष्णो दशभिः सहस्रैः ।

avad'rap'sō , agm'śhumatīmatiṣh'ṭhate ।

iyāna[hk]' kṛṣh'ṇō daśhabhis' sahas'raiīḥi ।

आवर्तमिन्द्रः शच्या धमन्तम् । उपस्नुहि तं नृमणामथद्रामिति ।

āvar'tamin'draśh' śhach'yā dhaman'tam ।

upas'nuhi tan' nṛmaṇāmathad'rāmiti ।

एतयैवेन्द्रः सलावृक्या सह । असुरान्परिवृश्चति ।

ētayaivēn'dras' salāvṛk'yā saha ।

asurān'parivṛśh'chati ।

पृथिव्यंशुमती । तामन्ववस्थितः संवत्सरो दिवं च ।

pṛthiv'yagm'śhumatī ।

tāman'vavas'thitas' saṁ'vat'sarō divañ' cha ।

नैवंविदुषाऽऽचार्यान्तेवासिनौ । अन्योन्यस्मै द्रुह्याताम् ।

naivaṁ'viduṣhā (ā)chār'yāan'tēvāsinau ।

an'yōn'yas'maiīd' druh'yātām ।

यो द्रुह्यति । भ्रश्यते स्वर्गाल्लोकात् ।

yōd' druh'yati । bhraśh'yatēs' svar'gāl'lōkā-te ।

www.vedavishwa.com www.saiveda.net

इत्यृतुमण्डलानि । सूर्यमण्डलान्याख्यायिकाः ।
अत , ऊर्ध्वꣳ संनिर्वचनाः ॥ १९ ॥
it'yṛtumaṇ'ḍalāni |
sūr'yamaṇ'ḍalāān'yākh'yāyikā-ḥa |
ata , ūrdh'vagm' sanir'vachanā-ḥa || 19 ||
[१-७-१] [1-7-1]
आरोगो भ्राजः पटरः पतङ्गः । स्वर्णरो ज्योतिषीमान् विभासः ।
ārōgōb' bhrāja[fp]' paṭara[fp]' pataṅ'gaḥa |
svar'ṇarōj' jyōtiṣhīmāne vibhāsaḥa |
ते , अस्मै सर्वे दिवमातपन्ति । ऊर्जं दुहाना , अनपस्फुरन्त , इति ।
tē , as'mai sar'vē divamātapan'ti |
ūr'jan' duhānā , anapas'phuran'ta , iti |
कश्यपोऽष्टमः । स महामेरुं न जहाति ।
kaśh'yapō (a)ṣh'ṭamaḥa | sa mahāmērun' na jahāti |
तस्यैषा भवति । यत्ते शिल्पं कश्यप रोचनावत् ।
tas'yaiṣhā bhavati |
yat'tē śhil'paṅ' kaśh'yapa rōchanāvate |
इन्द्रियावत्पुष्कलं चित्रभानु ।
यस्मिन्त्सूर्या , अर्पितास्सप्त साकम् ॥ २० ॥
in'driyāvat'puṣh'kalañ' chit'rabhānu |
yas'min'tsūr'yā , ar'pitās'sap'ta sākam || 20 ||
[१-७-२] [1-7-2]
तस्मिन्राजानमधिविश्रयेममिति । ते , अस्मै सर्वे कश्यपाज्ज्योतिर्लभन्ते ।
tas'min'rājānamadhiviśh'rayēmamiti |
tē , as'mai sar'vē kaśh'yapāj'jyōtir'labhan'tē |

www.sanvedaa.net www.vedavishwa.com

तान्त्सोमः कश्यपादधिनिर्द्धमति । भ्रस्ताकर्मकृदिवैवम् ।
tān’tsōma[hk]’ kaśh’yapādadhinird’dhamati ।
bhras’tākar’makṛdivaivam ।
प्राणो जीवानीन्द्रियजीवानि । सप्त शीर्षण्याः प्राणाः ।
prāṇō jīvānīn’driyajīvāni ।
sap’ta śhīr’ṣhaṇ’yā[fp]’ prāṇā-ḥa ।
सूर्या , इत्याचार्याः । अपश्यमहमेतान्त्सप्त सूर्यानिति ।
sūr’yā , it’yāchār’yā-ḥa ।
apaśh’yamahamētān’tsap’ta sūūr’yāniti ।
पञ्चकर्णो वात्स्यायनः । सप्तकर्णश्च प्लाक्षिः ॥ २१ ॥
pañ’chakar’ṇō vāt’syāyanaḥa ।
sap’takar’naśh’chap’ plāk’ṣhiḥi ॥ 21 ॥
[१-७-३] [1-7-3]
आनुश्रविक , एव नौ कश्यप , इति । उभौ वेदयिते ।
ānuśh’ravika , ēva nau kaśh’yapa , iti । ubhau vēdayitē ।
न हि शेकुमिव महामेरुं गन्तुम् ।
अपश्यमहमेतत्सूर्यमण्डलं परिवर्तमानम् ।
na hi śhēkumiva mahāmēruṅ’ gan’tum ।
apaśh’yamahamētat’sūr’yamaṇ’ḍalam’ parivar’tamānam ।
गार्ग्यः प्राणत्रातः । गच्छन्त महामेरुम् ।
gār’gya[fp]’ prāṇat’rātaḥa । gat’chhan’ta mahāmērum ।
एकं चाजहतम् । भ्राजपटरपतङ्गा निहने ।
ēkañ’ chājahatam । bhrājapaṭarapataṅ’gā nihanē ।



www.sanskritweb.net www.vedavishwa.com

तिष्ठन्नातपन्ति । तस्मादिह तप्रितपाः ॥ २२ ॥

tiṣh'ṭhan'nātapan'ti I tas'mādiha tap'tritapā-ḥa II 22 II

[१-७-४] [1-7-4]

अमुत्रेतरे । तस्मादिहातप्रितपाः ।

amut'rētarē I tas'mādihātap'tritapā-ḥa I

तेषामेषा भवति । सप्त सूर्या दिवमनुप्रविष्टाः ।

tēṣhāmēṣhā bhavati I

sap'ta sūr'yā divamanup'raviṣh'ṭā-ḥa I

तानन्वेति पथिभिर्दक्षिणावान् । ते , अस्मै सर्वे घृतमातपन्ति ।

tānan'vēti pathibhir'dak'shiṇāvāne I

tē , as'mai sar'vē ghṛtamātapan'ti I

ऊर्जं दुहाना , अनपस्फुरन्त , इति । सप्तर्त्विजस्सूर्या , इत्याचार्याः ।

ūr'jan' duhānā , anapas'phuran'ta , iti I

sap'tar'tvijas'sūr'yā , it'yāchār'yā-ḥa I

तेषामेषा भवति । सप्त दिशो नानासूर्याः ॥ २३ ॥

tēṣhāmēṣhā bhavati I sap'ta diśhō nānāsūr'yā-ḥa II 23 II

[१-७-५] [1-7-5]

सप्त होतार , ऋत्विजः । देवा , आदित्या ये सप्त ।

sap'ta hōtāra , ṛt'vijaḥa I dēvā , ādit'yā yē sap'ta I

तेभिः सोमाभीरक्षण , इति । तदप्याम्नायः ।

tēbhis' sōmābhīrak'ṣhaṇa , iti I tadap'yām'nāyaḥa I

दिग्भ्राज , ऋतून् करोति ।

dig'bhrāja , ṛtūun' karōti I



www.sanatanvedavishva.com

एतयैवावृता सहस्रसूर्यताया , इति वैशंपायनः ।
ētayaivāvṛtā sahas'rasūr'yatāyā ,
iti vaiśham'pāyanaḥa ।
तस्यैषा भवति । यद्याव , इन्द्र ते शतꣳशतं भूमीः ।
tas'yaiṣhā bhavati ।
yad'dyāva , in'dra tē śhatagm'śhatam' bhūmīīḥi ।
उत स्युः । नत्वा वज्रिन्त्सहस्रꣳ सूर्याः ॥ २४ ॥
utas' syuḥu । nat'vā vaj'rin'tsahas'ragm' sūr'yāāḥa ॥ 24 ॥
[१-७-६] [1-7-6]
अनुनजातमष्ट रोदसी , इति । नानालिङ्गत्वादृतूनां नानासूर्यत्वम् ।
अष्टौ तु व्यवसिता , इति । सूर्यमण्डलान्यष्टात , ऊर्ध्वम् । तेषामेषा भवति ।
anunajātamaṣh'ṭa rōdasī , iti ।
nānāliṅ'gat'vādṛtūnān' nānāsūr'yat'vam ।
aṣh'ṭau tuv' vyavasitā , iti ।
sūr'yamaṇ'ḍalān'yaṣh'ṭāta , ūrdh'vam ।
tēṣhāmēṣhā bhavati ।
चित्रं देवानामुदगादनीकम् । चक्षुर्मित्रस्य वरुणस्याग्नेः ।
chit'ran' dēvānāmudagādanīkam ।
chak'ṣhur'mit'ras'ya varuṇas'yāg'nē-ḥē ।
आप्रा द्यावापृथिवी , अन्तरिक्षम् ।
सूर्य , आत्मा जगतस्तस्थुषश्चेति ॥ २५ ॥
āp'rād' dyāvāpṛthivī , an'tarik'ṣham ।
sūr'ya , āt'mā jagatas'tas'thuṣhaśh'chēti ॥ 25 ॥

[१-८-१]   [1-8-1]

क्वेदमभ्रॅन्निविशते । क्वायꣳ संवत्सरो मिथः ।

kvēdamabh’ran’niviśhatē ।

kvāyagm’ saṁ’vat’sarō mithaḥa ।

क्वाहः क्वेयन्देव रात्री । क्व मासा , ऋतवः श्रिताः ।

kvāha[hk]’ kvēyan’dēva rāt’rī ।

kva māsā , ṛtavaśh’ śhritā-ḥa ।

अर्धमासा मुहूर्ताः । निमेषास्त्रुटिभिस्सह ।

ar’dhamāsā muhūr’tā-ḥa । nimēṣhās’truṭibhis’saha ।

क्वेमा , आपो निविशन्ते । यदीतो यान्ति संप्रति ।

kvēmā , āpō niviśhan’tē । yadītō yān’ti sam’prati ।

काला , अप्सु निविशन्ते । आपस्सूर्ये समाहिताः ॥ २६ ॥

kālā , ap’su niviśhan’tē । āpas’sūr’yē samāhitā-ḥa ॥ 26 ॥

[१-८-२]   [1-8-2]

अभ्राण्यपः प्रपद्यन्ते । विद्युत्सूर्ये समाहिता ।

abh’rāṇ’yapa[fp]’ prapad’yan’tē ।

vid’yut’sūr’yē samāhitā ।

अनवर्णे , इमे भूमी । इयं चासौ च रोदसि ।

anavar’ṇē , imē bhūmī । iyañ’ chāsau cha rōdasi ।

किꣳस्विदत्रान्तरा भूतम् । येनेमे विधृते , उभे ।

kig’ges’vidat’rān’tarā bhūtam । yēnēmē vidhṛtē , ubhē ।

विष्णुना विधृते भूमी । इति वत्सस्य वेदना ।

viṣh’ṇunā vidhṛtē bhūmī । iti vat’sas’ya vēdanā ।

इरावती धेनुमती हि भूतम् । सूयवसिनी मनुषे दशस्ये ॥ २७ ॥

irāvatī dhēnumatī hi bhūtam ।

sūyavasinī manuṣhē daśhas'yēē ॥ 27 ॥

[१-८-३]   [1-8-3]

व्यष्टभ्नाद्रोदसी विष्णवेते । दाधर्थ पृथिवीमभितो मयूखैः ।

vyaṣh'ṭabh'nād'rōdasī viṣh'ṇavētē ।

dādhar'tha pṛthivīmabhitō mayūkhaiīḥi ।

किन्तद्विष्णोर्बलमाहुः । का दीप्तिः किं परायणम् ।

kin'tad'viṣh'ṇōr'balamāhuḥu ।

kā dīp'ti[hk]' kim' parāyaṇam ।

एको यद्धारयद्देवः । रेजती रोदसी , उभे ।

ēkō yad'dhārayad'dēvaḥa । rējatī rōdasī , ubhē ।

वाताद्विष्णोर्बलमाहुः । अक्षराद्दीप्तिरुच्यते ।

vātād'viṣh'ṇōr'balamāhuḥu । ak'ṣharāād'dīp'tiruch'yatē ।

त्रिपदाद्धारयद्देवः । यद्विष्णोरेकमुत्तमम् ॥ २८ ॥

tripadād'dhārayad'dēvaḥa ।

yad'viṣh'ṇōrēkamut'tamam ॥ 28 ॥

[१-८-४]   [1-8-4]

अग्नयो वायवश्चैव । एतदस्य परायणम् ।

ag'nayō vāyavaśh'chaiva । ētadas'ya parāyaṇam ।

पृच्छामि त्वा परं मृत्युम् । अवमं मध्यमञ्चतुम् ।

pṛt'chhāmit' tvā param' mṛt'yum ।

avamam' madh'yamañ'chatum ।

लोकञ्च पुण्यपापानाम् । एतत्पृच्छामि संप्रति ।

lōkañ’cha puṇ’yapāpānām । ētat’pṛt’chhāmi sam’prati ।

अमुमाहुः परं मृत्युम् । पवमानं तु मध्यमम् ।

amumāhu[fp]’ param’ mṛt’yum ।

pavamānan’ tu madh’yamam ।

अग्निरेवावमो मृत्युः । चन्द्रमाश्चतुरुच्यते ॥ २९ ॥

ag’nirēvāvamō mṛt’yuḥu ।

chan’dramāāśh’chaturuch’yatē ॥ 29 ॥

[१-८-५] [1-8-5]

अनाभोगाः परं मृत्युम् । पापास्संयन्ति सर्वदा ।

anābhōgā[fp]’ param’ mṛt’yum ।

pāpās’sañ’yan’ti sar’vadā ।

आभोगास्त्वेव संयन्ति । यत्र पुण्यकृतो जनाः ।

ābhōgās’tvēva sañ’yan’ti ।

yat’ra puṇ’yakṛtō janā-ḥa ।

ततो मध्यममायन्ति । चतुमग्निं च संप्रति ।

tatō madh’yamamāyan’ti । chatumag’niñ’ cha sam’prati ।

पृच्छामि त्वा पापकृतः । यत्र यातयते यमः ।

pṛt’chhāmit’ tvā pāpakṛtaḥa । yat’ra yātayatē yamaḥa ।

त्वं नस्तद्ब्रम्हन् प्रब्रूहि । यदि वेत्थासतो गृहान् ॥ ३० ॥

tvan’ nas’tad’bram’han’ prab’rūhi ।

yadi vēēt’thāsatō gṛhā-ne ॥ 30 ॥



www.sanskritvedavishwa.com

[१-८-६] [1-8-6]

कश्यपादुदितास्सूर्याः । पापान्निर्घ्नन्ति सर्वदा ।

kaśh’yapāduditās’sūr’yā-ḥa ।

pāpān’nir’ghnan’ti sar’vadā ।

रोदस्योरन्तर्देशेषु । तत्र न्यस्यन्ते वासवैः ।

rōdas’yōran’tar’dēśhēṣhu ।

tat’ran’ nyas’yan’tē vāsavai-ḥi ।

तेऽशरीराः प्रपद्यन्ते । यथाऽपुण्यस्य कर्मणः ।

tē (a)śharīrā[fp]’ prapad’yan’tē ।

yathā (a)puṇ’yas’ya kar’maṇaḥa ।

अपाण्यपादकेशासः । तत्र तेऽयोनिजा जनाः ।

apāṇ’yapādakēśhāsaḥa । tat’ra tē (a)yōnijā janā-ḥa ।

मृत्वा पुनर्मृत्युमापद्यन्ते । अद्यमानास्स्वकर्मभिः ॥ ३१ ॥

mṛt’vā punar’mṛt’yumāpad’yan’tē ।

ad’yamānās’svakar’mabhiḥi ॥ 31 ॥

[१-८-७] [1-8-7]

आशातिकाः क्रिमय , इव । ततः पूयन्ते वासवैः ।

āśhātikā[hk]’ krimaya , iva । tata[fp]’ pūyan’tē vāsavai-ḥi ।

अपैतं मृत्युं जयति । य , एवं वेद ।

apaitam’ mṛt’yuñ’ jayati । ya , ēvaṁ’ vēda ।

स खल्वैवंविद्ब्राम्हणः । दीर्घश्रुत्तमो भवति ।

sa khal’vaivaṁ’vid’brām’haṇaḥa ।

dīr’ghaśh’rut’tamō bhavati ।



www.vedavisvaa.com
www.saiveda.net

कश्यपस्यातिथिस्सिद्धगमनस्सिद्धागमनः । तस्यैषा भवति ।
kaśh’yapas’yātithis’sid’dhagamanas’
sid’dhāgamanaḥa ।
tas’yaiṣhā bhavati ।
आ यस्मिन्त्सप्त वासवाः । रोहन्ति पूर्व्या रुहः ॥ ३२ ॥
ā yas’min’n’tsap’ta vāsavā-ḥa ।
rōhan’ti pūr’vyā ruhaḥa ॥ 32 ॥
[१-८-८] [1-8-8]
ऋषिर्ह दीर्घश्रुत्तमः । इन्द्रस्य घर्मो , अतिथिरिति ।
ṛṣhir’ha dīr’ghaśh’rut’tamaḥa ।
in’dras’ya ghar’mō , atithiriti ।
कश्यपः पश्यको भवति । यत्सर्वं परिपश्यतीति सौक्ष्म्यात् ।
kaśh’yapa[fp]’ paśh’yakō bhavati ।
yat’sar’vam’ paripaśh’yatīti saukṣh’myā-te ।
अथाग्नेरष्टपुरुषस्य । तस्यैषा भवति ।
athāg’nēraṣh’ṭapuruṣhas’ya । tas’yaiṣhā bhavati ।
अग्ने नय सुपथा राये , अस्मान् । विश्वानि देव वयुनानि विद्वान् ।
ag’nē naya supathā rāyē , as’mā-ne ।
viśh’vāni dēva vayunāni vid’vā-ne ।
युयोध्यस्मज्जुहुराणमेनः । भूयिष्ठान्ते नम , उक्तिं विधेमेति ॥ ३३ ॥
yuyōdh’yas’maj’juhurāṇamēnaḥa ।
bhūyiṣh’ṭhān’tē nama , uk’tiṁ’ vidhēmēti ॥ 33 ॥
[१-९-१] [1-9-1]
अग्निश्च जातवेदाश्च । सहोजा , अजिराप्रभुः ।
ag’niśh’cha jātavēdāśh’cha । sahōjā , ajirāp’rabhuḥu ।

www.sarveda.net www.vedavishwa.com

वैश्वानरो नर्यापाश्च । पङ्क्तिराधाश्च सप्तमः ।

vaiśh'vānarō nar'yāpāśh'cha ।

paṅ'ktirādhāśh'cha sap'tamaḥa ।

विसर्पैवाऽष्टमोऽग्नीनाम् । एतेऽष्टौ वसवः क्षिता , इति ।

visar'pēvā (a)ṣh'ṭamō (a)g'nīnām ।

ētē (a)ṣh'ṭau vasavaḥa , kṣhitā , iti ।

यथर्त्वेवाग्नेरर्चिर्वर्णविशेषाः । नीलार्चिश्च पीतकार्चिश्चेति ।

yathar'tvēvāg'nērar'chir'var'ṇaviśhēṣhā-ḥa ।

nīlār'chiśh'cha pītakāār'chiśh'chēti ।

अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य ।

प्रभ्राजमाना व्यवदाताः ॥ ३४ ॥

atha vāyōrēkādaśhapuruṣhas'yaikādaśhas'trīkas'ya ।

prabh'rājamānāv' vyavadātā-ḥa ॥ 34 ॥

[१-९-२] [1-9-2]

याश्च वासुकिवैद्युताः । रजताः परुषाः श्यामाः ।

yāśh'cha vāsukivaid'yutā-ḥa ।

rajatā[fp]' paruṣhāśh' śhyāmā-ḥa ।

कपिला , अतिलोहिताः । ऊर्ध्वा , अवपतन्ताश्च ।

kapilā , atilōhitā-ḥa । ūrdh'vā , avapatan'tāśh'cha ।

वैद्युत , इत्येकादश । नैनं वैद्युतो हिनस्ति ।

vaid'yuta , it'yēkādaśha । nainaṁ' vaid'yutō hinas'ti ।

य , एवं वेद । स होवाच व्यासः पाराशर्यः ।

ya , ēvaṁ' vēda । sa hōvāchav' vyāsa[fp]' pārāśhar'yaḥa ।



www.vedavishwa.com

विद्युद्वधमेवाहं मृत्युमैच्छमिति । न त्वकामꣳ हन्ति ॥ ३५ ॥
vid'yud'vadhamēvāham' mṛt'yumaiīt'chhamiti l
nat' tvakāmagm' han'ti ll 35 ll
[१-९-३] [1-9-3]
य , एवं वेद । अथ गन्धर्वगणाः । स्वानभ्राट् । अङ्घारिर्बम्भारिः ।
ya , ēvaṁ' vēda l atha gan'dhar'vagaṇā-ḥa l
svānabh'rā-ṭe l aṅ'ghārir'bam'bhāriḥi l
हस्तस्सुहस्तः । कृशानुर्विश्वावसुः ।
has'tas'suhas'taḥa l kṛśhānur'viśh'vāvasuḥu l
मूर्धन्वान्त्सूर्यवर्चाः । कृतिरित्येकादश गन्धर्वगणाः ।
mūr'dhan'vān'tsūūr'yavar'chā-ḥa l
kṛtirit'yēkādaśha gan'dhar'vagaṇā-ḥa l
देवाश्च महादेवाः । रश्मयश्च देवा गरगिरः ॥ ३६ ॥
dēvāśh'cha mahādēvā-ḥa l
raśh'mayaśh'cha dēvā garagiraḥa ll 36 ll
[१-९-४] [1-9-4]
नैनं गरो हिनस्ति । य , एवं वेद ।
nainaṁ' garō hinas'ti l ya , ēvaṁ' vēda l
गौरीमिमाय सलिलानि तक्षती । एकपदी द्विपदी सा चतुष्पदी ।
gaurīmimāya salilāni tak'ṣhatī l
ēkapadīd' dvipadī sā chatuṣh'padī l
अष्टापदी नवपदी बभूवुषी । सहस्राक्षरा परमे व्योमन्निति ।
aṣh'ṭāpadī navapadī babhūvuṣhīī l
sahas'rāk'ṣharā paramēv' vyōman'niti l

वाचो॒ विशे॒षणम्। अथ निग॒द्व्याख्या॒ताः ।

vāchō viśhēṣhaṇam । atha nigadav'yākh'yātā-ḥa ।

ताननु॒क्रमिष्या॒मः । व॒राह॒वस्स्व॒त॒पसः ॥ ३७ ॥

tānanuk'ramiṣh'yāmaḥa । varāhavas'svatapasaḥa ॥ 37 ॥

[१-९-५] [1-9-5]

वि॒द्युन्म॑हसो॒ धूप॑यः । श्वापयो॒ गृहमे॒धाश्चे॒त्ये॒ते ।

vid'yun'mahasō dhūpayaḥa ।

śhvāpayō gṛhamēdhāāśh'chēt'yētē ।

ये॒ चेमेऽशि॑मिवि॒द्विषः । पर्जन्या॒स्सप्त पृ॒थिवीमभि॒वर्षन्ति ।

yē chēmē (a)śhimivid'viṣhaḥa ।

par'jan'yās'sap'ta pṛthivīmabhivar'ṣhan'ti ।

वृष्टिभि॒रि॒ति । ए॒तयै॒व वि॒भक्ति॒विप॒री॒ताः ।

vṛṣh'ṭibhiriti । ētayaiva vibhak'tivipar̥ītā-ḥa ।

स॒प्तभि॒र्वातै॒रु॒दी॒रिताः । अमूँल्लो॒कानभि॒वर्षन्ति ।

sap'tabhir'vātairudīritā-ḥa । amūn'lōkānabhivar'ṣhan'ti ।

ते॒षा॒मे॒षा॒ भ॒वति । स॒मा॒न॒मे॒त॒दुद॑कम् ॥ ३८ ॥

tēṣhāmēṣhā bhavati । samānamētadudakam ॥ 38 ॥

[१-९-६] [1-9-6]

उ॒च्चैत्य॑व॒चाह॑भिः । भूमिं॑ प॒र्जन्या॒ जिन्व॑न्ति ।

ut'chait'yavachāhabhiḥi । bhūmim' par'jan'yā jin'van'ti ।

दिवं॑ जिन्वन्त्य॒ग्नय॒ , इ॒ति । यद॒क्षरं॑ भूत॒कृ॒तम् ।

divañ' jin'van'tyag'naya , iti ।

yadak'ṣharam' bhūtakṛtam ।

विश्वे॑ दे॒वा , उपास॑ते । म॒हर्षि॑मस्य गो॒प्तार॑म् ।
viśh’vē dēvā , upāsatē | mahar’ṣhimas’ya gōp’tāram’m |
ज॒मद॑ग्निमकु॑र्वत । ज॒मद॑ग्निराप्या॑यते ।
jamadag’nimakur’vata | jamadag’nirāp’yāyatē |
छन्दो॑भिश्चतुरु॒त्तरैः॑ । राज्ञस्सोम॑स्य तृ॒प्तास॑ः ॥ ३९ ॥
chhan’dōbhiśh’chaturut’tarai-ḥi |
rāj’ñas’sōmas’ya tṛp’tāsaḥa || 39 ||
[१-९-७] [1-9-7]
ब्रम्ह॑णा वी॒र्या॑वता । शि॒वा नः॑ प्र॒दिशो॒ दिशः॑ ।
bram’haṇā vīr’yāvatā | śhivā na[fp]’ pradiśhō diśhaḥa |
तच्छं॒योरावृ॑णीमहे । गा॒तुं य॒ज्ञाय॑ ।
tat’chhañ’yōrāvṛṇīmahē | gātuñ’ yaj’ñāya |
गा॒तुं य॒ज्ञप॑तये । दैवी॒स्स्व॒स्तिर॑स्तु नः ।
gātuñ’ yaj’ñapatayē | daivīs’vas’tiras’tu naḥa |
स्व॒स्तिर्मानु॑षेभ्यः । ऊ॒र्ध्वं जि॑गातु भे॒ष॒जम् ।
svas’tir’mānuṣhēbh’yaḥa | ūrdh’vañ’ jigātu bhēṣhajam |
शन्नो॑ , अस्तु द्वि॒पदे॑ । शं चतु॑ष्पदे ।
सोमपा३ , असोमपा३ , इति निगद॑व्याख्या॒ताः ॥ ४० ॥
śhan’nō , as’tud’ dvipadē | śhañ’ chatuṣh’padē |
sōmapā3 , asōmapā3 , iti nigadav’yākh’yātā-ḥa || 40 ||
[१-१०-१] [1-10-1]
स॒ह॒स्र॒वृदि॑यं भू॒मिः । प॒रं व्यो॑म स॒हस्र॑वृत् ।
sahas’ravṛdiyam’ bhūmiḥi | param’ vyōma sahas’ravṛte |

अश्विना भुज्यू नासत्या । विश्वस्य जगतस्पती ।

aśh’vinā bhuj’yū nāsat’yā I viśh’vas’ya jagatas’patī I

जाया भूमिः पतिर्व्योम । मिथुनन्ता , अतुर्यथुः ।

jāyā bhūmi[fp]’ patir’vyōma I

mithunan’tā , atur’yathuḥu I

पुत्रो बृहस्पती रुद्रः । सरमा , इति स्त्रीपुमम् ।

put’rō bṛhas’patī rud’raḥa I saramā , itis’ strīpumam I

शुक्रं वामन्यद्यजतं वामन्यत् । विषुरूपे , अहनी द्यौरिव स्थः ॥ ४१ ॥

śhuk’raṁ’ vāman’yad’yajataṁ’ vāman’yate I

viṣhurūpē , ahanīd’ dyaurivas’ sthaḥa II 41 II

[१-१०-२] [1-10-2]

विश्वा हि माया , अवथः स्वधावन्तौ । भद्रा वां पूषणाविह रातिरस्तु ।

viśh’vā hi māyā , avathas’ svadhāvan’tau I

bhad’rā vāām’ pūṣhaṇāviha rātiras’tu I

वासात्यौ चित्रौ जगतो निधानौ । द्यावाभूमी चरथः सꣳ सखायौ ।

vāsāāt’yau chit’rau jagatō nidhānauū I

dyāvābhūmī charathas’ sagm’ sakhāyau I

तावश्विना रासभाश्वा हवं मे । शुभस्पती , आगतꣳ सूर्यया सह ।

tāvaśh’vinā rāsabhāāśh’vā havam’ mē I

śhubhas’patī , āgatagm’ sūr’yayā saha I

त्युग्रोह भुज्युमश्विनोदमेघे । रयिन्न कश्चिन्ममृवां २ , अवाहाः ।

tyug’rōha bhuj’yumaśh’vinōdamēghē I

rayin’na kaśh’chin’mamṛvāṁ’ 2 , avāhā-ḥa I

www.vedavishwa.com

तमूहथुर्नौभिरात्मन्वतीभिः । अन्तरिक्षप्रुद्भिरपोदकाभिः ॥ ४२ ॥
tamūhathur'naubhirāāt'man'vatībhiḥi ǀ
an'tarik'ṣhap'ruḍ'bhirapōdakābhiḥi ǁ 42 ǁ
[१-१०-३] [1-10-3]
तिस्रः क्षपस्त्रिरहाऽतिव्रजद्भिः । नासत्या भुज्युमूहथुः पतङ्गैः ।
tis'raḥa , kṣhapas'triraha (a)tiv'rajad'bhiḥi ǀ
nāsat'yā bhuj'yumūhathu[fp]' pataṅ'gai-ḥi ǀ
समुद्रस्य धन्वन्नार्द्रस्य पारे । त्रिभीरथैश्शतपद्भिः षडश्वैः ।
samud'ras'ya dhan'van'nār'dras'ya pārē ǀ
tribhīrathaiīśh'śhatapad'bhiṣh' ṣhaḍaśh'vai-ḥi ǀ
सवितारं वितन्वन्तम् । अनुबध्नाति शाम्बरः ।
savitāraṁ' vitan'van'tam ǀ anubadh'nāti śhām'baraḥa ǀ
आपपूरुषम्बरश्चैव । सविताऽरेपसो भवत् ।
āpapūruṣham'baraśh'chaiva ǀ savitā (a)rēpasō bhavate ǀ
त्यग्ँ सुतृप्तं विदित्वैव । बहुसोम गिरं वशी ॥ ४३ ॥
tyagm' sutṛp'taṁ' vidit'vaiva ǀ
bahusōma giraṁ' vaśhī ǁ 43 ǁ
[१-१०-४] [1-10-4]
अन्वेति तुग्रो वक्रियान्तम् । आयसूयान्त्सोमतृप्सुषु ।
an'vēti tug'rō vak'riyān'tam ǀ āyasūyānt'sōmatṛp'suṣhu ǀ
स संग्रामस्तमोद्योऽत्योतः । वाचो गाः पिपाति तत् ।
sa saṅ'grāmas'tamōōd'yō (a)t'yōtaḥa ǀ
vāchō gā[fp]' pipāti tate ǀ


www.vedavishwa.com
www.sanskritveda.net

स तद्गोभिस्तवाँऽत्येत्यन्ये । रक्षसाँऽनन्विताश्च ये ।

sa tad’gōbhis’tavāā (a)t’yēt’yan’yē I

rak’ṣhasā (a)nan’vitāśh’cha yē I

अन्वेति परिवृत्यास्तः । एवमेतौ स्थौ , अश्विना ।

an’vēti parivṛt’yās’taḥa I ēvamētaus’ sthō , aśh’vinā I

ते , एते द्युःपृथिव्योः । अहरहर्गर्भन्दधाथे ॥ ४४ ॥

tē , ētēd’ dyu[fp]’pṛthiv’yō-ḥo I

aharahar’gar’bhan’dadhāthē II 44 II

[१-१०-५] [1-10-5]

तयोरेतौ वत्सावहोरात्रे । पृथिव्या , अहः । दिवो रात्रिः । ता , अविसृष्टौ ।

tayōrētau vat’sāvahōrāt’rē I pṛthiv’yā , ahaḥa I

divō rāt’riḥi I tā , avisṛṣh’ṭau I

दम्पती , एव भवतः । तयोरेतौ वत्सौ । अग्निश्चादित्यश्च । रात्रेर्वत्सः ।

dam’patī , ēva bhavataḥa I tayōrētau vat’sau I

ag’niśh’chādit’yaśh’cha I rāt’rēr’vat’saḥa I

श्वेत , आदित्यः । अन्होऽग्निः ॥ ४५ ॥

śhvēta , ādit’yaḥa I an’hō (a)g’niḥi II 45 II

[१-१०-६] [1-10-6]

ताम्रो , अरुणः । ता , अविसृष्टौ । दम्पती , एव भवतः । तयोरेतौ वत्सौ ।

tām’rō , aruṇaḥa I tā , avisṛṣh’ṭau I

dam’patī , ēva bhavataḥa I tayōrētau vat’sau I

वृत्रश्च वैद्युतश्च । अग्नेर्वृत्रः । वैद्युतं , आदित्यस्य । ता , अविसृष्टौ ।

vṛt’raśh’cha vaid’yutaśh’cha I ag’nēr’vṛt’raḥa I

vaid’yuta , ādit’yas’ya I tā , avisṛṣh’ṭau I

www.vedavishwa.com

दम्पती , एव भवतः । तयोरेतौ वत्सौ ॥ ४६ ॥
dam’patī , ēva bhavataḥa I tayōrētau vat’sau II 46 II
[१-१०-७] [1-10-7]
उष्मा च नीहारश्च । वृत्रस्योष्मा ।
uṣh’mā cha nīhāraśh’cha I vṛt’ras’yōṣh’mā I
वैद्युतस्य नीहारः । तौ तावेव प्रतिपद्येते ।
vaid’yutas’ya nīhāraḥa I tau tāvēvap’ pratipad’yētē I
सेयꣳ रात्री गर्भिणी पुत्रेण संवसति । तस्या वा , एतदुल्बणम् ।
sēyagm’ rāt’rī gar’bhiṇī put’rēṇa saṁ’vasati I
tas’yā vā , ētadul’baṇam’m I
यद्रात्रौ रश्मयः । यथा गोर्गर्भिण्या , उल्बणम् ।
yad’rāt’rau raśh’mayaḥa I
yathā gōr’gar’bhiṇ’yā , ul’baṇam’m I
एवमेतस्या , उल्बणम् । प्रजयिष्णुः प्रजया च पशुभिश्च भवति ।
ēvamētas’yā , ul’baṇam’m I
prajayiṣh’ṇu[fp]’ prajayā cha paśhubhiśh’cha bhavati I
य , एवं वेद । एतमुद्यन्तमपियन्तं चेति ।
ya , ēvaṁ’ vēda I ētamud’yan’tamapiyan’tañ’ chēti I
आदित्यः पुण्यस्य वत्सः । अथ पवित्राङ्गिरसः ॥ ४७ ॥
ādit’ya[fp]’ puṇ’yas’ya vat’saḥa I
atha pavit’rāṅ’girasaḥa II 47 II
[१-११-१] [1-11-1]
पवित्रवन्तः परिवाजमासते । पितैषां प्रत्नो , अभिरक्षति व्रतम् ।
pavit’ravan’ta[fp]’ parivājamāsatē I
pitaiṣhāām’ prat’nō , abhirak’ṣhativ’ vratam I

महस्संमुद्रं वरुणस्तिरोदधे । धीरा , इच्छेकुर्धरुणेष्वारभम्॒ ।
mahas'samud'ram' varuṇas'tirōdadhē ।
dhīrā , it'chhēkur'dharuṇēṣh'vārabham'm ।
पवित्रं ते वितंतं ब्रम्हणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः ।
pavit'ran' tē vitatam' bram'haṇas'patēē ।
prabhur'gāt'rāṇi par'yēṣhi viśh'vataḥa ।
अतप्ततनूर्न तदामो , अश्नुते । शृतास , इद्वहन्तस्तत्समाशत ।
atap'tatanūr'na tadāmō , aśh'nutē ।
śhṛtāsa , id'vahan'tas'tat'samāśhata ।
ब्रम्हा देवानाम् । असतस्सद्ये ततक्षुः ॥ ४८ ॥
bram'hā dēvānāām । asatas'sad'yē tatak'ṣhuḥu ॥ 48 ॥
[१-११-२] [1-11-2]
ऋषयस्सप्तात्रिश्च यत् । सर्वेऽत्रयो , अगस्त्यश्च ।
ṛṣhayas'sap'tāt'riśh'cha yate ।
sar'vē (a)t'rayō , agas'tyaśh'cha ।
नक्षत्रैश्शंकृतोऽवसन् । अथ सवितुः श्यावाश्वस्यावर्तिकामस्य ।
nak'ṣhat'raiśh'śhaṅ'kṛtō (a)vasan'ne ।
atha savituśh' śhyāvāśh'vas'yāvar'tikāmas'ya ।
अमी य , ऋक्षा निहितास , उच्चा । नक्तं ददृश्रे कुहचिद्दिवेयुः ।
amī ya , ṛk'ṣhā nihitāsa , ut'chā ।
nak'tan' dadṛśh'rē kuhachid'divēyuḥu ।
अदब्धानि वरुणस्य व्रतानि । विचाकशच्चन्द्रमा नक्षत्रमेति ।
adab'dhāni varuṇas'yav' vratāni ।
vichākaśhat'chan'dramā nak'ṣhat'ramēti ।



www.saivedanet.com www.vedavisiwa.com

तत्सवितुर्वरेण्यम् । भर्गो देवस्य धीमहि ॥ ४९ ॥

tat'savitur'varēēṇ'yam । bhar'gō dēvas'ya dhīmahi ॥ 49 ॥

[१-११-३] [1-11-3]

धियो यो नः प्रचोदयात् । तत्सवितुर्वृणीमहे ।

dhiyō yō na[fp]' prachōdayāāte । tat'savitur'vṛṇīmahē ।

वयन्देवस्य भोजनम् । श्रेष्ठꣳसर्वधातमम् ।

vayan'dēvas'ya bhōjanam ।

śhrēṣh'ṭhagm'sar'vadhātamam ।

तुरं भगस्य धीमहि । अपागूहत सविता तृभीन् ।

turam' bhagas'ya dhīmahi । apāgūhata savitā tṛbhīne ।

सर्वान्दिवो , अन्धसः । नक्तन्तान्यभवन्दृशे ।

sar'vāān' divō , an'dhasaḥa । nak'tan'tān'yabhavan'dṛśhē ।

अस्थ्यस्था संभविष्यामः । नाम नामैव नाम मे ॥ ५० ॥

as'thyas'thnā sam'bhaviṣh'yāmaḥa ।

nāma nāmaiva nāma mēē ॥ 50 ॥

[१-११-४] [1-11-4]

नपुꣳसकं पुमाꣳस्त्र्यस्मि । स्थावरोऽस्म्यथ जङ्गमः ।

napugm'sakam' pumāgest'ryas'mi ।

sthāvarō (a)s'myatha jaṅ'gamaḥa ।

यजेऽयक्षि यष्टाहे च । मया भूतान्ययक्षत ।

yajē (a)yak'ṣhi yaṣh'ṭāhē cha । mayā bhūtān'yayak'ṣhata ।

पशवो मम भूतानि । अनूबन्ध्योऽस्म्यहं विभुः ।

paśhavō mama bhūtāni ।

anūban'dhyō (a)s'myahaṁ' vibhuḥu ।



www.shivadvaita.net www.vedavishwa.com

स्त्रियँस्सतीः । ता , उं मे पुंग्ंस , आंहुः ।
striyas'satī-ḥi I tā , u mē pugm'sa , āhuḥu I
पश्यँदक्षण्वान्नविचैंतदन्धः । कविर्यः पुत्रस्स , इमा चिंकेत ॥ ५१ ॥
paśh'yadak'shaṇ'vān'navichētadan'dhaḥa I
kavir'ya[fp]' put'ras'sa , imā chikēta II 51 II
[१-११-५] [1-11-5]
यस्ता विंजानात्संवितुः पिता संत् । अन्धो मणिमंविन्दत् ।
yas'tā vijānāt'savitu[fp]' pitā sate I
an'dhō maṇimavin'date I
तमंनङ्गुलिरावंयत् । अग्रीवः प्रत्यंमुञ्चत् ।
tamanaṅ'gulirāvayate I ag'rīva[fp]' prat'yamuñ'chate I
तमजिंह्वा , असश्चंत । ऊर्ध्वंमूलमंवाक्छाखम् ।
tamajih'vā , asaśh'chata I ūrdh'vamūlamavāk'chhākham I
वृक्षं यों वेद सम्प्रंति । न स जातु जनंः श्रद्दध्यात् ।
vṛk'ṣhañ' yō vēda sam'prati I
na sa jātu janaśh' śhrad'dadh'yā-te I
मृत्युर्मां मारयादिंतिः । हसितग्ं रुदिंतङ्गीतम् ॥ ५२ ॥
mṛt'yur'mā mārayāditiḥi I hasitagm' ruditaṅ'gītam II 52 II
[१-११-६] [1-11-6]
वीणांपणवलासिंतम् । मृतञ्जीवं च यत्किंचित् ।
vīṇāpaṇavalāsitam I mṛtañ'jīvañ' cha yat'kiñ'chite I
अङ्गानिं स्नेव विद्धि तत् । अतृंष्यग्ंस्तृष्यं ध्यायत् ।
aṅ'gānis' snēva vid'dhi tate I
atṛṣh'yag'ges'tṛṣh'yad' dhyāyate I


www.sanskritvedavishwa.com

अस्माज्जाता मे मिथू चरन्। पुत्रो निर्ऋत्यां वैदेहः ।

as'māj'jātā mē mithū charan'ne ।

put'rō nir'ṛt'yā vaidēhaḥa ।

अचेता यश्च चेतनः । स तं मणिमविन्दत् ।

achētā yaśh'cha chētanaḥa । sa tam' maṇimavin'date ।

सोऽनङ्गुलिरावयत् । सोऽग्रीवः प्रत्यमुञ्चत् ॥ ५३ ॥

sō (a)naṅ'gulirāvayate ।

sō (a)g'rīva[fp]' prat'yamuñ'chate ॥ 53 ॥

[१-११-७] [1-11-7]

सोऽजिह्वो , असश्चत । नैतमृषिं विदित्वा नगरं प्रविशेत् ।

sō (a)jih'vō , asaśh'chata ।

naitamṛṣhim' vidit'vā nagaram' praviśhē-te ।

यदि प्रविशेत् । मिथौ चरित्वा प्रविशेत् ।

yadip' praviśhē-te । mithau charit'vāp' praviśhē-te ।

तत्सम्भवस्य व्रतम् । आतमग्ने रथन्तिष्ठ ।

tat'sam'bhavas'yav' vratam । ātamag'nē rathan'tiṣh'ṭha ।

एकाश्वमेकयोजनम् । एकचक्रमेकधुरम् ।

ēkāāśh'vamēkayōjanam । ēkachak'ramēkadhuram ।

वातध्राजिगतिं विभो । न रिष्यति न व्यथते ॥ ५४ ॥

vātadh'rājigatim' vibhō । na riṣh'yati nav' vyathatē ॥ 54 ॥

[१-११-८] [1-11-8]

नास्याक्षो यातु सज्जति । यच्छ्वेतान्रोहिताङ्श्चाग्नेः ।

nās'yāk'ṣhō yātu saj'jati ।

yat'chhvētāān'rōhitāgeśh'chāg'nē-ḥē ।

www.saivedanet
www.vedavishwa.com

र॒थे यु॑क्त्वाऽधि॒तिष्ठ॑ति । एक॑या च द॒शभि॑श्च॒ स्व॒भू॒ते ।

rathē yuk’tvā (a)dhitiṣh’ṭhati ।

ēkayā cha daśhabhiśh’chas’ svabhūtē ।

द्वाभ्या॑मि॒ष्टये॑ विꣳश॒त्या च । ति॒सृभि॑श्च॒ वह॑से त्रिꣳश॒ता च ।

नि॒युद्भि॑र्वायवि॒हता॑ वि॒मुञ्च ॥ ५५ ॥

dvābh’yāmiṣh’ṭayē vigm’śhat’yā cha ।

tisṛbhiśh’cha vahasēt’ trigm’śhatā cha ।

niyud’bhir’vāyavihatā vimuñ’cha ॥ 55 ॥

[१-१२-१] [1-12-1]

आत॑नुष्व॒ प्रत॑नुष्व । उ॒द्धमाऽऽध॑म॒ सन्ध॑म ।

ātanuṣh’vap’ pratanuṣh’va ।

ud’dhamā (ā)dhama san’dhama ।

आ॒दि॒त्ये च॒न्द्रव॑र्णा॒नाम् । गर्भ॑मा॒धे॑हि॒ यः पु॒मान् ।

ādit’yē chan’dravar’ṇānām ।

gar’bhamādhēhi ya[fp]’ pumāne ।

इ॒तस्सि॒क्तꣳ सूर्य॑गतम् । च॒न्द्रम॑से॒ रस॑ङ्कृधि ।

itas’sik’tagm’ sūr’yagatam । chan’dramasē rasaṅ’kṛdhi ।

वा॒राद॑ञ्जन॑याग्रेऽग्निम् । य , एको॑ रु॒द्र , उ॒च्यते॑ ।

vārādañ’janayāg’rē (a)g’nim । ya , ēkō rud’ra , uch’yatē ।

अ॒सं॒ख्या॒तास्स॑हस्रा॒णि । स्म॒र्यते॑ न च दृ॒श्यते॑ ॥ ५६ ॥

asaṅ’khyātās’sahas’rāṇi । smar’yatē na cha dṛśh’yatē ॥ 56 ॥

[१-१२-२] [1-12-2]

ए॒वमे॒तन्नि॑बोधत । आ॒मन्द्रै॒रि॑न्द्र॒ हरि॑भिः ।

ēvamētan’nibōdhata । āman’drairin’dra haribhiḥi ।



www.vedaneti.com www.vedavishwa.com

याहि मयूरंरोमभिः । मा त्वा केचिन्नियेमुरिन्न पाशिनः ।
yāhi mayūrarōmabhiḥi I
māt' tvā kēchin'niyēmurin'na pāśhinaḥa I
दधन्वेव ता , इहि । मा मन्द्रैरिन्द्र हरिभिः ।
dadhan'vēva tā , ihi I mā man'drairin'dra haribhiḥi I
यामि मयूरंरोमभिः । मा मा केचिन्नियेमुरिन्न पाशिनः ।
yāmi mayūrarōmabhiḥi I
mā mā kēchin'niyēmurin'na pāśhinaḥa I
निधन्वेव तां २ , इमि । अणुभिश्च महद्भिश्च ॥ ५७ ॥
nidhan'vēva tāṁ' 2 , imi I
aṇubhiśh'cha mahad'bhiśh'cha II 57 II
[१-१२-३] [1-12-3]
निघृष्वैरसमायुतैः । कालैर्हरित्वमापन्नैः ।
nighṛṣh'vairasamāyutai-ḥi I kālair'harit'vamāpan'nai-ḥi I
इन्द्रायाहि सहस्रयुक् । अग्निर्विभ्राष्टिवसनः ।
in'drāyāhi sahas'rayuke I ag'nir'vibh'rāṣh'ṭivasanaḥa I
वायुश्श्वेतसिकद्रुकः । संवत्सरो विषूवर्णैः ।
vāyuśh'śhvētasikad'rukaḥa I
saṁ'vat'sarō viṣhūvar'ṇaiīḥi I
नित्यास्तेऽनुचरास्तव । सुब्रम्हण्योꣳ सुब्रम्हण्योꣳ सुब्रम्हण्योम् ।
nit'yās'tē (a)nucharās'tava I
sub'ram'haṇ'yōgm' sub'ram'haṇ'yōgm'
sub'ram'haṇ'yōm I

इन्द्रागच्छ हरिव , आगच्छ मेधातिथेः । मेष वृषणश्वस्य मेने ॥ ५८ ॥

in'drāgat'chha hariva , āgat'chha mēdhātithē-ḥē ।

mēṣha vṛṣhaṇaśh'vas'ya mēnē ॥ 58 ॥

[१-१२-४] [1-12-4]

गौरावस्कन्दिन्नहल्यायै जार । कौशिकब्राम्हण गौतमंब्रुवाण ।

gaurāvas'kan'din'nahal'yāyai jāra ।

kauśhikab'rām'haṇa gautamab'ruvāṇa ।

अरुणाश्वा , इहागताः । वसवः पृथिविक्षितः ।

aruṇāśh'vā , ihāgatā-ḥa । vasava[fp]' pṛthivik'ṣhitaḥa ।

अष्टौ दिग्वाससोऽग्नयः । अग्निश्च जातवेदाश्चेत्येते ।

aṣh'ṭau dig'vāsasō (a)g'nayaḥa ।

ag'niśh'cha jātavēdāśh'chēt'yētē ।

ताम्राश्वास्ताम्ररथाः । ताम्रवर्णास्तथाऽसिताः ।

tām'rāśh'vāas'tām'rarathā-ḥa ।

tām'ravar'ṇāas'tathā (a)sitā-ḥa ।

दण्डहस्ताः खादग्दतः । इतो रुद्राः पराङ्गताः ॥ ५९ ॥

daṇ'dahas'tāā[hk]' khādag'datahа ।

itō rud'rāā[fp]' parāṅ'gatā-ḥa ॥ 59 ॥

[१-१२-५] [1-12-5]

उक्तङ्ग् स्थानं प्रमाणञ्च पुर , इत । बृहस्पतिश्च सविता च ।

uk'tag'ges' sthānam' pramāṇañ'cha pura , ita ।

bṛhas'patiśh'cha savitā cha ।

विश्वरूपैरिहागताम् । रथेनोदकवर्त्मना ।

viśh'varūpairihāgatām । rathēnōdakavart'manā ।

अप्सुषा , इति तद्द्वयोः । उक्तो वेषो वासाꣳसि च ।
ap’suṣhā , iti tad’dvayō-ḥo | uk’tō vēṣhō vāsāgm’si cha |
कालावयवानामितः प्रतीच्या । वासात्या , इत्यश्विनोः ।
kālāvayavānāmita[fp]’ pratīch’yā |
vāsāt’yā , it’yaśh’vinō-ḥo |
कोऽन्तरिक्षे शब्दङ्करोतीति । वासिष्ठो रौहिणो मीमाꣳसाञ्चक्रे ।
kō (a)n’tarik’ṣhē śhab’daṅ’karōtīti |
vāsiṣh’ṭhō rauhiṇō mīmāgm’sāñ’chak’rē |
तस्यैषा भवति । वाश्रेव विद्युदिति ।
tas’yaiṣhā bhavati | vāśh’rēva vid’yuditi |
ब्रम्हण , उदरणमसि । ब्रम्हण , उदीरणमसि ।
bram’haṇa , udaraṇamasi | bram’haṇa , udīraṇamasi |
ब्रम्हण , आस्तरणमसि । ब्रम्हण , उपस्तरणमसि ॥ ६० ॥
bram’haṇa , ās’taraṇamasi |
bram’haṇa , upas’taraṇamasi || 60 ||
[१-१३-१] [1-13-1]
अष्टयोनीमष्टपुत्राम् । अष्टपत्नीमिमां महीम् ।
aṣh’ṭayōnīmaṣh’ṭaput’rām | aṣh’ṭapat’nīmimām’ mahīm |
अहं वेद न मे मृत्युः । नचामृत्युरघाऽहरत् ।
aham’ vēda na mē mṛt’yuḥu | nachāmṛt’yuraghā (a)harate |
अष्टयोन्यष्टपुत्त्रम् । अष्टपदिदमन्तरिक्षम् ।
aṣh’ṭayōn’yaṣh’ṭaput’tram | aṣh’ṭapadidaman’tarik’ṣham |
अहं वेद न मे मृत्युः । नचामृत्युरघाऽहरत् ।
aham’ vēda na mē mṛt’yuḥu | nachāmṛt’yuraghā (a)harate |


www.sanatanavishwa.com

अ॒ष्टयो॑नीमष्टपु॑त्राम् । अ॒ष्टप॑त्नीम॒मूंन्दिव॒मँ ॥ ६१ ॥

aṣh'ṭayōnīmaṣh'ṭaput'rām ।

aṣh'ṭapat'nīmamūn'divam'm ॥ 61 ॥

[१-१३-२] [1-13-2]

अ॒हं वेद॒ न मे॑ मृत्युः । नचा॒मृ॑त्यु॒रघाऽऽह॑रत् ।

aham' vēda na mē mṛt'yuḥu । nachāmṛt'yuraghā (ā)harate ।

सु॒त्रामा॑णं म॒हीमू॒षु । अदि॑ति॒र्द्यौरदि॑ति॒रन्तरि॑क्षम् ।

sut'rāmāṇam' mahīmūṣhu ।

aditir'dyauraditiran'tarik'ṣham ।

अदि॑तिर्मा॒ता स पि॒ता स पु॒त्रः । विश्वे॑ दे॒वा , अदि॑तिः पञ्च॒जना॑ः ।

aditir'mātā sa pitā sa put'raḥa ।

viśh'vē dēvā , aditi[fp]' pañ'chajanāāḥa ।

अदि॑तिर्जा॒तमदि॑ति॒र्जनि॑त्वम् । अ॒ष्टौ पु॒त्रासो॒ , अदि॑तेः ।

aditir'jātamaditir'janit'vam । aṣh'ṭau put'rāsō , aditē-ḥē ।

ये जा॒तास्त॒न्व॑ः परि॑ । दे॒वां २ , उप॑प्रैत्स॒प्तभि॑ः ॥ ६२ ॥

yē jātās'tan'va[fp]' pari ।

dēvām' 2 , upap'rait'sap'tabhiḥi ॥ 62 ॥

[१-१३-३] [1-13-3]

प॒रा मा॒र्ता॒ण्डमास्य॑त् । स॒प्तभि॑ः पु॒त्रैरदि॑तिः ।

parā mār'tāṇ'ḍamās'yate । sap'tabhi[fp]' put'rairaditiḥi ।

उप॒प्रैत्पू॒र्व्यं॑ यु॒गमँ । प्र॒जायै॑ मृ॒त्यवे॒ तत् ।

upap'rait'pūr'vyañ' yugam'm । prajāyai mṛt'yavē tate ।

प॒रा मा॒र्ता॒ण्डमा॒भ॑रदिति॑ । ता॒ननु॒क्रमि॒ष्या॒मः ।

parā mār'tāṇ'ḍamābharaditi । tānanuk'ramiṣh'yāmaḥa ।



www.vedavishwa.com

मित्रश्च वरुणश्च । धाता चार्यमा च ।
mit’raśh’cha varuṇaśh’cha | dhātā chāār’yamā cha |
अग्ंशश्च भगश्च । इन्द्रश्च विवस्वाग्ंश्चेत्येते ।
agm’śhaśh’cha bhagaśh’cha |
in’draśh’cha vivas’vāgeśh’chēt’yētē |
हिरण्यगर्भो हग्ंसश्शुचिषत् । ब्रम्हजज्ञानं तदित्पदमिति ।
hiraṇ’yagar’bhō hagm’saśh’śhuchiṣhate |
bram’hajaj’ñānan’ tadit’padamiti |
गर्भः प्राजापत्यः । अथ पुरुषः सप्तपुरुषः ॥ ६३ ॥
gar’bha[fp]’ prājāpat’yaḥa |
atha puruṣhas’ sap’tapuruṣhaḥa || 63 ||
[१-१४-१] [1-14-1]
योऽसौ तपन्नुदेति । स सर्वेषां भूतानां प्राणानादायोदेति ।
yō (a)sau tapan’nudēti |
sa sar’vēṣhām’ bhūtānāām’ prāṇānādāyōdēti |
मा मे प्रजाया मा पशूनाम् । मा मम प्राणानादायोद्गाः ।
mā meēp’ prajāyā mā paśhūnām |
mā mamap’ prāṇānādāyōdagā-ḥa |
असौ योऽस्तमेति । स सर्वेषां भूतानां प्राणानादायास्तमेति ।
asau yōō (a)s’tamēti |
sa sar’vēṣhām’ bhūtānāām’ prāṇānādāyās’tamēti |
मा मे प्रजाया मा पशूनाम् । मा मम प्राणानादायाऽस्तङ्गाः ।
mā meēp’ prajāyā mā paśhūnām |
mā mamap’ prāṇānādāyā (a)s’taṅ’gā-ḥa |

असौ य , आपूर्यंति । स सर्वेंषां भूतानां प्राणैरापूर्यंति ॥ ६४ ॥

asau ya , āpūr'yati ।

sa sar'vēṣhām' bhūtānāām' prāṇairāpūr'yati ॥ 64 ॥

[१-१४-२]   [1-14-2]

मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरापूरिष्ठाः ।

mā mēēp' prajāyā mā paśhūnām ।

mā mamap' prāṇairāpūriṣh'ṭhā-ḥa ।

असौ योऽपक्षीयंति । स सर्वेंषां भूतानां प्राणैरपक्षीयति ।

asau yō (a)pak'ṣhīyati ।

sa sar'vēṣhām' bhūtānāām' prāṇairapak'ṣhīyati ।

मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपक्षेष्ठाः ।

mā mēēp' prajāyā mā paśhūnām ।

mā mamap' prāṇairapak'ṣhēṣh'ṭhā-ḥa ।

अमूनि नक्षत्राणि । सर्वेंषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च ।

amūni nak'ṣhat'rāṇi ।

sar'vēṣhām' bhūtānāām' prāṇairapap'rasar'pan'ti

chōt'sar'pan'ti cha ।

मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोत्सृपत ॥ ६५ ॥

mā mēēp' prajāyā mā paśhūnām ।

mā mamap' prāṇairapap'rasṛpata mōt'sṛpata ॥ 65 ॥

[१-१४-३]   [1-14-3]

इमे मासाश्चार्धमासाश्च । सर्वेंषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च ।

imē māsāāśh'chār'dhamāsāśh'cha ।

sar'vēṣhām' bhūtānāām' prāṇairapap'rasar'pan'ti

chōt'sar'pan'ti cha ।



www.sanskritweb.net / www.vedavishwa.com

मा मे॑ प्रजाया मा प॒शूनाम् । मा मम॑ प्राणैरप॑प्रसृपत मोत्सृ॑पत ।

mā mēēp' prajāyā mā paśhūnām I

mā mamap' prāṇairapap'rasṛpata mōt'sṛpata I

इम , ऋतव॑ः । सर्वे॑षां भूतानां॑प्राणैरप॑प्रसर्प॑न्ति चोत्स॑र्प॑न्ति च ।

ima , ṛtavaḥa I

sar'vēṣhām' bhūtānāām' prāṇairapap'rasar'pan'ti
chōt'sar'pan'ti cha I

मा मे॑ प्रजाया मा प॒शूनाम् । मा मम॑ प्राणैरप॑प्रसृपत मोत्सृ॑पत ।

mā mēēp' prajāyā mā paśhūnām I

mā mamap' prāṇairapap'rasṛpata mōt'sṛpata I

अयꣳ संवत्सरः । सर्वे॑षां भूतानां॑प्राणैरप॑प्रसर्प॑ति चोत्स॑र्प॑ति च ॥ ६६ ॥

ayagm' sam'vat'saraḥa I

sar'vēṣhām' bhūtānāām' prāṇairapap'rasar'pati
chōt'sar'pati cha II 66 II

[१-१४-४]   [1-14-4]

मा मे॑ प्रजाया मा प॒शूनाम् । मा मम॑ प्राणैरप॑प्रसृप मोत्सृ॑प ।

mā mēēp' prajāyā mā paśhūnām I

mā mamap' prāṇairapap'rasṛpa mōt'sṛpa I

इदमहः । सर्वे॑षां भूतानां॑प्राणैरप॑प्रसर्प॑ति चोत्स॑र्प॑ति च ।

idamahaḥa I

sar'vēṣhām' bhūtānāām' prāṇairapap'rasar'pati
chōt'sar'pati cha I

मा मे॑ प्रजाया मा प॒शूनाम् । मा मम॑ प्राणैरप॑प्रसृप मोत्सृ॑प ।

mā mēēp' prajāyā mā paśhūnām I

mā mamap' prāṇairapap'rasṛpa mōt'sṛpa I

इयꣳरात्रिः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोत्सर्पति च ।
iyagm'rāt'rihi ।
sar'vēṣhām' bhūtānāām' prāṇairapap'rasar'pati
chōt'sar'pati cha ।
मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृप मोत्सृप ।
mā mēēp' prajāyā mā paśhūnām ।
mā mamap' prāṇairapap'rasṛpa mōt'sṛpa ।
ओं भूर्भुवस्स्वः । एतद्वो मिथुनं मानो मिथुनꣳ रीढ्वम् ॥ ६७ ॥
ōm' bhūr'bhuvas'svaha ।
ētad'vō mithunam' mānō mithunagm' rīḍh'vam ॥ 67 ॥
[१-१५-१] [1-15-1]
अथादित्यस्याष्टपुरुषस्य । वसूनामादित्यानाꣳ स्थाने स्वतेजसा भानि ।
athādit'yas'yāṣh'ṭapuruṣhas'ya ।
vasūnāmādit'yānāges' sthānēs' svatējasā bhāni ।
रुद्राणामादित्यानाꣳ स्थाने स्वतेजसा भानि ।
आदित्यानामादित्यानाꣳ स्थाने स्वतेजसा भानि ।
rud'rāṇāmādit'yānāges' sthānēs' svatējasā bhāni ।
ādit'yānāmādit'yānāges' sthānēs' svatējasā bhāni ।
सताꣳसत्यानाम् । आदित्यानाꣳ स्थाने स्वतेजसा भानि ।
satāgm'sat'yānām ।
ādit'yānāges' sthānēs' svatējasā bhāni ।
अभिधून्वतामभिघ्नताम् । वातवतां मरुताम् ।
abhidhūn'vatāmabhigh'natām ।
vātavatām' marutām ।

आदित्यानाङ्ग्ं स्थाने स्वतेजसा भानि ।
ऋभूणामादित्यानाङ्ग्ं स्थाने स्वतेजसा भानि ।
ādit'yānāges' sthānēs' svatējasā bhāni ।
ṛbhūṇāmādit'yānāges' sthānēs' svatējasā bhāni ।
विश्वेषाँन्देवानाम् । आदित्यानाङ्ग्ं स्थाने स्वतेजसा भानि ।
viśh'vēṣhāān'dēvānām ।
ādit'yānāges' sthānēs' svatējasā bhāni ।
संवत्सरस्य सवितुः । आदित्यस्य स्थाने स्वतेजसा भानि ।
saṁ'vat'saras'ya savituḥu ।
ādit'yas'yas' sthānēs' svatējasā bhāni ।
ओं भुर्भुवस्स्वः । रश्मयो वो मिथुनं मा नो मिथुनꣳ रीढ्वम् ॥ ६८ ॥
ōm' bhur'bhuvas'svaḥa ।
raśh'mayō vō mithunam' mā nō
mithunagm' rīḍh'vam ॥ 68 ॥
[१-१६-१] [1-16-1]
आरोगस्य स्थाने स्वतेजसा भानि । भ्राजस्य स्थाने स्वतेजसा भानि ।
ārōgas'yas' sthānēs' svatējasā bhāni ।
bhrājas'yas' sthānēs' svatējasā bhāni ।
पटरस्य स्थाने स्वतेजसा भानि । पतङ्गस्य स्थाने स्वतेजसा भानि ।
paṭaras'yas' sthānēs' svatējasā bhāni ।
pataṅ'gas'yas' sthānēs' svatējasā bhāni ।
स्वर्णरस्य स्थाने स्वतेजसा भानि ।
ज्योतिषीमतस्य स्थाने स्वतेजसा भानि ।
svar'ṇaras'yas' sthānēs' svatējasā bhāni ।
jyōtiṣhīmatas'yas' sthānēs' svatējasā bhāni ।

विभासस्य स्थाने स्वतेजसा भानि । कश्यपस्य स्थाने स्वतेजसा भानि ।

vibhāsas'yas' sthānēs' svatējasā bhāni ।

kaśh'yapas'yas' sthānēs' svatējasā bhāni ।

ओं भुर्भुवस्स्वः । आपो वो मिथुनं मा नो मिथुनꣳ रीढ्वम् ॥ ६९ ॥

ōm' bhur'bhuvas'svaḥa ।

āpō vō mithunam' mā nō mithunagm' rīḍh'vam ॥ 69 ॥

[१-१७-१] [1-17-1]

अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य ।

प्रभ्राजमानानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ।

atha vāyōrēkādaśhapuruṣhas'yaikādaśhas'trīkas'ya ।

prabh'rājamānānāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ।

व्यवदातानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ।

वासुकिवैद्युतानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ।

vyavadātānāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ।

vāsukivaid'yutānāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ।

रजतानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ।

परुषाणाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ।

rajatānāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ।

paruṣhāṇāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ।

www.sanvada.net www.vedavishwa.com

श्यामानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ।
कपिलानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ।
śhyāmānāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ।
kapilānāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ।
अतिलोहितानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ।
ऊर्ध्वानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ॥ ७० ॥
atilōhitānāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ।
ūrdh'vānāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ॥ 70 ॥
[१-१७-२] [1-17-2]
अवपतन्तानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ।
वैद्युतानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि ।
avapatan'tānāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ।
vaid'yutānāgm' rud'rāṇāges'
sthānēs' svatējasā bhāni ।
प्रभ्राजमानीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि ।
व्यवदातीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि ।
prabh'rājamānīnāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।
vyavadātīnāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।



www.sanskritvedanet www.vedavishwa.com

वासुकिवैद्युतीनाꣳ रुद्राणीनाꣳ॒ स्थाने स्वतेज॑सा भा॒नि ।
रजतानाꣳ रुद्राणीनाꣳ॒ स्थाने स्वतेज॑सा भा॒नि ।
vāsukivaid'yutīnāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।
rajatānāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।

परुषाणाꣳ रुद्राणीनाꣳ॒ स्थाने स्वतेज॑सा भा॒नि ।
श्यामानाꣳ रुद्राणीनाꣳ॒ स्थाने स्वतेज॑सा भा॒नि ।
paruṣhāṇāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।
śhyāmānāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।

कपिलानाꣳ रुद्राणीनाꣳ॒ स्थाने स्वतेज॑सा भा॒नि ।
अतिलोहितीनाꣳ रुद्राणीनाꣳ॒ स्थाने स्वतेज॑सा भा॒नि ।
kapilānāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।
atilōhitīnāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।

ऊर्ध्वानाꣳ रुद्राणीनाꣳ॒ स्थाने स्वतेज॑सा भा॒नि ।
अवपतन्तीनाꣳ रुद्राणीनाꣳ॒ स्थाने स्वतेज॑सा भा॒नि ।
ūrdh'vānāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।
avapatan'tīnāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।

www.vedavishwa.com

वैद्युतीनाᳵं रुद्राणीनाᳶं स्थाने स्वतेजसा भानि । ओं भुर्भुवस्स्वः ।
रूपाणि वो मिथुनं मा नो मिथुनᳵं रीढ्वम् ॥ ७१ ॥

vaid'yutīnāgm' rud'rāṇīnāges'
sthānēs' svatējasā bhāni ।
ōm' bhur'bhuvas'svaḥa ।
rūpāṇi vō mithunam' mā nō
mithunagm' rīḍh'vam ॥ 71 ॥

[१-१८-१] [1-18-1]

अथाग्नेरष्टपुरुषस्य । अग्नेः पूर्वदिश्यस्य स्थाने स्वतेजसा भानि ।

athāg'nērash'ṭapurushas'ya ।
ag'nē[fp]' pūr'vadiśh'yas'yas'
sthānēs' svatējasā bhāni ।

जातवेदस , उपदिश्यस्य स्थाने स्वतेजसा भानि ।
सहोजसो दक्षिणदिश्यस्य स्थाने स्वतेजसा भानि ।

jātavēdasa , upadiśh'yas'yas'
sthānēs' svatējasā bhāni ।
sahōjasō dak'shiṇadiśh'yas'yas'
sthānēs' svatējasā bhāni ।

अजिराप्रभव , उपदिश्यस्य स्थाने स्वतेजसा भानि ।
वैश्वानरस्यापरदिश्यस्य स्थाने स्वतेजसा भानि ।

ajirāp'rabhava , upadiśh'yas'yas'
sthānēs' svatējasā bhāni ।
vaiśh'vānaras'yāparadiśh'yas'yas'
sthānēs' svatējasā bhāni ।

www.salveda.net
www.vedavishwa.com

नर्यापस , उपदिश्यस्य स्थाने स्वतेजसा भानि ।
पङ्क्तिराधस , उदग्दिश्यस्य स्थाने स्वतेजसा भानि ।
nar'yāpasa , upadiśh'yas'yas'
sthānēs' svatējasā bhāni ।
paṅ'ktirādhasa , udag'diśh'yas'yas'
sthānēs' svatējasā bhāni ।

विसर्पिण , उपदिश्यस्य स्थाने स्वतेजसा भानि । ओं भुर्भुवस्स्वः ।
visar'piṇa , upadiśh'yas'yas'
sthānēs' svatējasā bhāni ।
ōm' bhur'bhuvas'svaḥa ।

दिशो वो मिथुनं मा नो मिथुनꣳ रीढ्वम् ॥ ७२ ॥
diśhō vō mithunam' mā nō
mithunagm' rīḍh'vam ॥ 72 ॥

[१-१९-१] [1-19-1]

दक्षिणपूर्वस्यान्दिशि विसर्पी नरकः । तस्मान्नः परिपाहि ।
dak'ṣhiṇapūr'vas'yān'diśhi visar'pī narakaḥa ।
tas'mān'na[fp]' paripāhi ।

दक्षिणाऽपरस्यान्दिश्यविसर्पी नरकः । तस्मान्नः परिपाहि ।
dak'ṣhiṇā (a)paras'yān'diśh'yavisar'pī narakaḥa ।
tas'mān'na[fp]' paripāhi ।

उत्तरपूर्वस्यान्दिशि विषादी नरकः । तस्मान्नः परिपाहि ।
ut'tarapūr'vas'yān'diśhi viṣhādī narakaḥa ।
tas'mān'na[fp]' paripāhi ।



www.salvedaa.net www.vedavishwa.com

उत्तरापरस्यान्दिश्यविषादी नरकः । तस्मान्नः परिपाहि ।
आयस्मित्सप्त वासवा , इन्द्रियाणि शतक्रतवित्येते ॥ ७३ ॥
ut’tarāparas’yān’diśh’yaviṣhādī narakaḥa ।
tas’mān’na[fp]’ paripāhi ।
āyas’mint’sap’ta vāsavā ,
in’driyāṇi śhatak’ratavit’yētē ॥ 73 ॥
[१-२०-१] [1-20-1]
इन्द्रघोषा वो वसुभिः पुरस्तादुपदधताम् ।
मनोजवसो वः पितृभिर्दक्षिणत , उपदधताम् ।
in’draghōṣhā vō vasubhi[fp]’ puras’tādupadadhatām ।
manōjavasō va[fp]’ pitṛbhir’dak’ṣhiṇata , upadadhatām ।
प्रचेता वो रुद्रैः पश्चादुपदधताम् ।
विश्वकर्मा व , आदित्यैरुत्तरत , उपदधताम् ।
prachētā vō rud’rai[fp]’ paśh’chādupadadhatām ।
viśh’vakar’mā va , ādit’yairut’tarata , upadadhatām ।
त्वष्टा वो रूपैरुपरिष्टादुपदधताम् । संज्ञानं वः पश्चादिति ।
tvaṣh’ṭā vō rūpairupariṣh’ṭādupadadhatām ।
sañ’jñānaṁ’ va[fp]’ paśh’chāditi ।
आदित्यस्सर्वोऽग्निः पृथिव्याम् । वायुरन्तरिक्षे ।
ādit’yas’sar’vō (a)g’ni[fp]’ pṛthiv’yām । vāyuran’tarik’ṣhē ।
सूर्यो दिवि । चन्द्रमा दिक्षु । नक्षत्राणि स्वलोके । एवा ह्येव । एवा ह्यग्ने ।
sūr’yō divi । chan’dramā dik’ṣhu ।
nak’ṣhat’rāṇis’ svalōkē । ēvāh’ hyēva । ēvāh’ hyag’nē ।

एवा हि वायो । एवा हीन्द्र । एवा हि पूषन् । एवा हि देवाः ॥ ७४ ॥

ēvā hi vāyō | ēvā hīin'dra | ēvā hi pūṣhan'ne |

ēvā hi dēvā-ḥa || 74 ||

[१-२१-१] [1-21-1]

आपमापामपः सर्वाः । अस्मादस्मादितोऽमुतः ।

āpamāpāmapas' sar'vāāḥa | as'mādas'māditō (a)mutaḥa |

अग्निर्वायुश्च सूर्यश्च । सह सञ्चस्करर्द्धिया ।

ag'nir'vāyuśh'cha sūr'yaśh'cha |

saha sañ'chas'karard'dhiyā |

वाय्वश्वा रश्मिपतयः । मरीच्यात्मानो , अद्रुहः ।

vāy'vaśh'vā raśh'mipatayaḥa |

marīich'yāt'mānō , ad'ruhaḥa |

देवीर्भुवनसूवरीः । पुत्रवत्त्वाय मे सुत ।

dēvīr'bhuvanasūvarī-ḥi | put'ravat'tvāya mē suta |

महानाम्नीर्महामानाः । महसो महसस्स्वः ॥ ७५ ॥

mahānām'nīr'mahāmānā-ḥa |

mahasō mahasas'svaḥa || 75 ||

[१-२१-२] [1-21-2]

देवीः पर्जन्यसूवरीः । पुत्रवत्त्वाय मे सुत ।

dēvī[fp]' par'jan'yasūvarī-ḥi | put'ravat'tvāya mē suta |

अपाऽश्र्युष्णिमपारक्षः । अपाऽश्र्युष्णिमपारघम् ।

apā (a)śh'nyuṣh'ṇimapārak'ṣhaḥa |

apā (a)śh'nyuṣh'ṇimapāragham'm |



www.saivedavishwa.com

अपाँघ्रामपचाऽवर्तिम् । अपदेवीरितो हित ।
apāāgh’rāmapachā (a)var’tim’m । apadēvīritō hita ।
वज्रन्देवीरजीताङ्ंश्च । भुवनन्देवसूवरीः ।
vaj’ran’dēvīrajītāgeśh’cha । bhuvanan’dēvasūvarī-ḥi ।
आदित्यानदितिन्देवीम् । योनिनोर्ध्वमुदीषत ॥ ७६ ॥
ādit’yānaditin’dēvīm । yōninōrdh’vamudīṣhata ॥ 76 ॥
[१-२१-३] [1-21-3]
भद्रं कर्णेभिः श्रृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
bhad’raṅ’ kar’ṇēbhiśh’ śhṛṇuyāma dēvā-ḥa ।
bhad’ram’ paśh’yēmāk’ṣhabhir’yajat’rā-ḥa ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
sthirairaṅ’gaiis’tuṣh’ṭuvāgm’sas’tanūbhiḥi ।
vyaśhēma dēvahitañ’ yadāyuḥu ।
स्वस्ति न , इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
svas’ti na , in’drō vṛd’dhaśh’ravā-ḥa ।
svas’ti na[fp]’ pūṣhā viśh’vavēdā-ḥa ।
स्वस्तिनस्तार्क्ष्यो , अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
svas’tinas’tārk’ṣhyō , ariṣh’ṭanēmiḥi ।
svas’ti nō bṛhas’patir’dadhātu ।
केतवो , अरुणासश्च । ऋषयो वातरशनाः ।
kētavō , aruṇāsaśh’cha । ṛṣhayō vātaraśhanā-ḥa ।
प्रतिष्ठाꣳ शतधा हि । समाहितासो सहस्रधायसम् ।
pratiṣh’ṭhāgm’ śhatadhā hi ।
samāhitāsō sahas’radhāyasam ।


www.sriveda.net www.vedavishwa.com

शिवा नश्शन्तमा भवन्तु । दिव्या , आप , ओषधयः ।

śhivā naśh'śhan'tamā bhavan'tu ।

div'yā , āpa , ōṣhadhayaḥa ।

सुमृडीका सरस्वति । मा ते व्योम संदृशि ॥ ७७ ॥

sumṛḍīkā saras'vati । mā tēv' vyōma san'dṛśhi ॥ 77 ॥

[१-२२-१]   [1-22-1]

योऽपां पुष्पं वेद । पुष्पवान्प्रजावाँन्पशुमान्भवति ।

yō (a)pām' puṣh'paṁ' vēda ।

puṣh'pavān'prajāvāān'paśhumān'bhavati ।

चन्द्रमा वा , अपां पुष्पम् । पुष्पवान्प्रजावाँन्पशुमान्भवति ।

chan'dramā vā , apām' puṣh'pam'm ।

puṣh'pavān'prajāvāān'paśhumān'bhavati ।

य , एवं वेद । योऽपामायतनं वेद ।

ya , ēvaṁ' vēda । yō (a)pāmāyatanaṁ' vēda ।

आयतनवान्भवति । अग्निर्वा , अपामायतनम् ।

āyatanavān'bhavati । ag'nir'vā , apāmāyatanam ।

आयतनवान्भवति । योऽग्नेरायतनं वेद ॥ ७८ ॥

āyatanavān'bhavati । yōō (a)g'nērāyatanaṁ' vēda ॥ 78 ॥

[१-२२-२]   [1-22-2]

आयतनवान्भवति । आपो वा , अग्नेरायतनम् ।

āyatanavān'bhavati । āpō vā , ag'nērāyatanam ।

आयतनवान्भवति । य , एवं वेद ।

āyatanavān'bhavati । ya , ēvaṁ' vēda ।

योऽपामायतनं वेद । आयतनवान्भवति ।
yō (a)pāmāyatanaṁ’ vēda | āyatanavān’bhavati |
वायुर्वा , अपामायतनम् । आयतनवान्भवति ।
vāyur’vā , apāmāyatanam | āyatanavān’bhavati |
यो वायोरायतनं वेद । आयतनवान्भवति ॥ ७९ ॥
yō vāyōrāyatanaṁ’ vēda | āyatanavān’bhavati || 79 ||
[१-२२-३] [1-22-3]
आपो वै वायोरायतनम् । आयतनवान्भवति । य , एवं वेद ।
āpō vai vāyōrāyatanam | āyatanavān’bhavati |
ya , ēvaṁ’ vēda |
योऽपामायतनं वेद । आयतनवान्भवति ।
yō (a)pāmāyatanaṁ’ vēda | āyatanavān’bhavati |
असौ वै तपन्नपामायतनम् । आयतनवान्भवति ।
asau vai tapan’napāmāyatanam | āyatanavān’bhavati |
योऽमुष्य तपत , आयतनं वेद । आयतनवान्भवति ।
आपो वा , अमुष्य तपत , आयतनम् ॥ ८० ॥
yō (a)muṣh’ya tapata , āyatanaṁ’ vēda |
āyatanavān’bhavati |
āpō vā , amuṣh’ya tapata , āyatanam || 80 ||
[१-२२-४] [1-22-4]
आयतनवान्भवति । य , एवं वेद ।
āyatanavān’bhavati | ya , ēvaṁ’ vēda |
योऽपामायतनं वेद । आयतनवान्भवति ।
yō (a)pāmāyatanaṁ’ vēda | āyatanavān’bhavati |

चन्द्रमा वा , अपामायतनम् । आयतनवान्भवति ।

chan’dramā vā , apāmāyatanam । āyatanavān’bhavati ।

यश्चन्द्रमस , आयतनं वेद । आयतनवान्भवति ।

yaśh’chan’dramasa , āyatanaṁ’ vēda ।

āyatanavān’bhavati ।

आपो वै चन्द्रमस , आयतनम् । आयतनवान्भवति ॥ ८१ ॥

āpō vai chan’dramasa , āyatanam ।

āyatanavān’bhavati ॥ 81 ॥

[१-२२-५] [1-22-5]

य , एवं वेद । योऽपामायतनं वेद ।

ya , ēvaṁ’ vēda । yō (a)pāmāyatanaṁ’ vēda ।

आयतनवान्भवति । नक्षत्राणि वा , अपामायतनम् ।

āyatanavān’bhavati । nak’ṣhat’rāṇi vā , apāmāyatanam ।

आयतनवान्भवति । यो नक्षत्राणामायतनं वेद ।

āyatanavān’bhavati । yō nak’ṣhat’rāṇāmāyatanaṁ’ vēda ।

आयतनवान्भवति । आपो वै नक्षत्राणामायतनम् ।

āyatanavān’bhavati । āpō vai nak’ṣhat’rāṇāmāyatanam ।

आयतनवान्भवति । य , एवं वेद ॥ ८२ ॥

āyatanavān’bhavati । ya , ēvaṁ’ vēda ॥ 82 ॥

[१-२२-६] [1-22-6]

योऽपामायतनं वेद । आयतनवान्भवति ।

yō (a)pāmāyatanaṁ’ vēda । āyatanavān’bhavati ।

पर्जन्यो वा , अपामायतनम् । आयतनवान्भवति ।

par’jan’yō vā , apāmāyatanam । āyatanavān’bhavati ।

यः प॒र्जन्य॑स्या॒ऽऽयत॑न॒ं वेद॑ । आ॒यत॑नवान्भवति ।
ya[fp]’ par’jan’yas’yā (ā)yatanaṁ’ vēda ।
āyatanavān’bhavati ।
आपो॒ वै प॒र्जन्य॑स्या॒ऽऽयत॑नम् । आ॒यत॑नवान्भवति ।
āpō vai par’jan’yas’yā (ā)yatanam । āyatanavān’bhavati ।
य , ए॒वं वेद॑ । योऽपामा॒यत॑न॒ं वेद॑ ॥ ८३ ॥
ya , ēvaṁ’ vēda । yō (a)pāmāyatanaṁ’ vēda ॥ 83 ॥
[१-२२-७] [1-22-7]
आ॒यत॑नवान्भवति । सं॒व॒त्स॒रो वा , अ॒पामा॒यत॑नम् ।
āyatanavān’bhavati । saṁ’vat’sarō vā , apāmāyatanam ।
आ॒यत॑नवान्भवति । यस्सं॑वत्स॒रस्या॒यत॑न॒ं वेद॑ ।
āyatanavān’bhavati । yas’saṁ’vat’saras’yāyatanaṁ’ vēda ।
आ॒यत॑नवान्भवति । आपो॒ वै सं॑वत्स॒रस्या॒ऽऽयत॑नम् ।
āyatanavān’bhavati । āpō vai saṁ’vat’saras’yā (ā)yatanam ।
आ॒यत॑नवान्भवति । य , ए॒वं वेद॑ ।
āyatanavān’bhavati । ya , ēvaṁ’ vēda ।
योऽ॑प्सु नाव॒ं प्रति॑ष्ठितां॒ वेद॑ । प्रत्ये॒व ति॑ष्ठति ॥ ८४ ॥
yōō (a)p’su nāvaṁ’ pratiṣh’ṭhitāṁ’ vēda ।
prat’yēva tiṣh’ṭhati ॥ 84 ॥
[१-२२-८] [1-22-8]
इ॒मे वै लो॒का , अ॒प्सु प्रति॑ष्ठिताः । तदे॒षाऽभ्यनू॑क्ता ।
imē vai lōkā , ap’sup’ pratiṣh’ṭhitā-ḥa ।
tadēṣhā (a)bh’yanūūk’tā ।

अपाꣳ रसमुदयꣳ सन् । सूर्ये शुक्रꣳ समाभृतम् ।

apāgm’ rasamudayagm’ san’ne ।

sūr’yē śhuk’ragm’ samābhṛtam ।

अपाꣳ रसस्य यो रसः । तं वो गृण्हाम्युत्तममिति ।

apāgm’ rasas’ya yō rasaḥa ।

taṁ’ vō gṛṇ’hām’yut’tamamiti ।

इमे वै लोका , अपाꣳ रसः । तेऽमुष्मिन्नादित्ये समाभृताः ।

imē vai lōkā , apāgm’ rasaḥa ।

tē (a)muṣh’min’nādit’yē samābhṛtā-ḥa ।

जानुदघ्नीमुत्तरवेदीङ्खात्वा । अपां पूरयित्वा गुल्फदघ्नम् ॥ ८५ ॥

jānudagh’nīmut’taravēdīn’khāt’vā ।

apām’ pūrayit’vā gul’phadagh’nam ॥ 85 ॥

[१-२२-९] [1-22-9]

पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च सङ्ग्स्तीर्य । तस्मिन्विहायसे ।

puṣh’karapar’ṇai[fp]’ puṣh’karadaṇ’ḍai[fp]’

puṣh’karaiśh’cha sag’ges’tīr’ya ।

tas’min’vihāyasē ।

अग्निं प्रणीयोपसमाधाय । ब्रम्हवादिनो वदन्ति ।

ag’nim’ praṇīyōpasamādhāya । bram’havādinō vadan’ti ।

कस्मात्प्रणीतेऽयमग्निश्चीयते । साप्रणीतेऽयमप्सु ह्ययञ्चीयते ।

kas’māāt’praṇītē (a)yamag’niśh’chīyatēē ।

sāp’raṇītē (a)yamap’suh’ hyayañ’chīyatēē ।

असौ भुवनेऽप्यनाहिताग्निरेताः । तमभित , एता , अबीष्टका , उपदधाति ।

asau bhuvanē (a)p’yanāhitāg’nirētā-ḥa ।

tamabhita , ētā , abīṣh’ṭakā , upadadhāti ।

अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु ॥ ८६ ॥

ag’nihōt’rē dar’śhapūr’ṇamāsayōōḥo ।

paśhuban’dhē chātur’mās’yēṣhu ॥ 86 ॥

[१-२२-१०]   [1-22-10]

अथो , आहुः । सर्वेषु यज्ञक्रतुष्विति ।

athō , āhuḥu । sar’vēṣhu yaj’ñak’ratuṣh’viti ।

एतद्ध स्म वा , आहुश्शाण्डिलाः । कमग्निञ्चिनुते ।

ētad’dhas’ sma vā , āhuśh’śhaṇ’ḍilā-ḥa ।

kamag’niñ’chinutē ।

सत्रियमग्निञ्चिन्वानः । संवत्सरं प्रत्यक्षेण ।

sat’riyamag’niñ’chin’vānaḥa ।

saṁ’vat’saram’ prat’yak’ṣhēṇa ।

कमग्निञ्चिनुते । सावित्रमग्निञ्चिन्वानः ।

kamag’niñ’chinutē । sāvit’ramag’niñ’chin’vānaḥa ।

अमुमादित्यं प्रत्यक्षेण । कमग्निञ्चिनुते ॥ ८७ ॥

amumādit’yam’ prat’yak’ṣhēṇa । kamag’niñ’chinutē ॥ 87 ॥

[१-२२-११]   [1-22-11]

नाचिकेतमग्निञ्चिन्वानः । प्राणान्प्रत्यक्षेण ।

nāchikētamag’niñ’chin’vānaḥa । prāṇān’prat’yak’ṣhēṇa ।

कमग्निञ्चिनुते । चातुर्होत्रियमग्निञ्चिन्वानः ।

kamag’niñ’chinutē । chātur’hōt’riyamag’niñ’chin’vānaḥa ।

ब्रम्ह प्रत्यक्षेण । कमग्निञ्चिनुते ।

bram’hap’ prat’yak’ṣhēṇa । kamag’niñ’chinutē ।

वैश्वसृजमग्निञ्चिन्वानः । शरीरं प्रत्यक्षेण ।

vaiśh'vasṛjamag'niñ'chin'vānaḥa |

śharīram' prat'yak'ṣhēṇa |

कमग्निञ्चिनुते । उपानुवाक्यमाशुमग्निञ्चिन्वानः ॥ ८८ ॥

kamag'niñ'chinutē |

upānuvāk'yamāśhumag'niñ'chin'vānaḥa || 88 ||

[१-२२-१२] [1-22-12]

इमान्लोकान्प्रत्यक्षेण । कमग्निञ्चिनुते ।

imān'lōkān'prat'yak'ṣhēṇa | kamag'niñ'chinutē |

इममारुणकेतुकमग्निञ्चिन्वान , इति । य , एवासौ ।

imamāruṇakētukamag'niñ'chin'vāna , iti | ya , ēvāsau |

इतश्चामुतश्चाऽव्यतीपाती । तमिति ।

itaśh'chāmutaśh'chā (a)v'yatīpātī | tamiti |

योऽग्नेर्मिथूया वेद । मिथुनवान्भवति ।

yōō (a)g'nēr'mithūyā vēda | mithunavān'bhavati |

आपो वा , अग्नेर्मिथूयाः । मिथुनवान्भवति । य , एवं वेद ॥ ८९ ॥

āpō vā , ag'nēr'mithūyā-ḥa | mithunavān'bhavati |

ya , ēvaṁ' vēda || 89 ||

[१-२३-१] [1-23-1]

आपो वा , इदमासन्त्सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् ।

āpō vā , idamāsant'salilamēva |

sap' prajāpatirēka[fp]' puṣh'karapar'ṇē samabhavate |

तस्यान्तर्मनसि कामस्समवर्तत । इदꣳ सृजेयमिति ।

tas'yān'tar'manasi kāmas'samavar'tata | idagm' sṛjēyamiti |

तस्माद्यत्पुरुषो मनसाऽभिगच्छति । तद्वाचा वदति ।

tas’mād’yat’purushō manasā (a)bhigat’chhati I

tad’vāchā vadati I

तत्कर्मणा करोति । तदेषाऽभ्यनूक्ता ।

tat’kar’maṇā karōti I tadēṣhā (a)bh’yanūūk’tā I

कामस्तदग्रे समवर्तताधि । मनसो रेतः प्रथमं यदासीत् ॥ ९० ॥

kāmas’tadag’rē samavar’tatādhi I

manasō rēta[fp]’ prathamañ’ yadāsīīte II 90 II

[१-२३-२] [1-23-2]

सतो बन्धुमसति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषेति ।

satō ban’dhumasati niravin’dan’ne I

hṛdip’ pratīṣh’yā kavayō manīṣhēti I

उपैनन्तदुपनमति । यत्कामो भवति ।

upainan’tadupanamati I yat’kāmō bhavati I

य , एवं वेद । स तपोऽतप्यत । स तपस्तप्त्वा । शरीरमधूनुत ।

ya , ēvaṁ’ vēda I sa tapō (a)tap’yata I

sa tapas’tap’tvā I śharīramadhūnuta I

तस्य यन्माꣳसमासीत् ।

ततोऽरुणाः केतवो वातरशना , ऋषय , उदतिष्ठन् ॥ ९१ ॥

tas’ya yan’māgm’samāsīīte I

tatō (a)ruṇā[hk]’ kētavō vātaraśhanā , ṛṣhaya ,

udatiṣh’ṭhan’ne II 91 II



www.vedavishwa.com

[१-२३-३] [1-23-3]

ये नखाँः । ते वैखानसाः । ये वालाँः । ते वालखिल्याः ।

yē nakhāāḥa । tē vaikhānasā-ḥa ।

yē vālāāḥa । tē vālakhil’yā-ḥa ।

यो रसः । सोऽपाम् । अन्तरतः कूर्मं भूतँ सर्पन्तम् । तमब्रवीत् ।

मम वैत्वङ्मांसा । समभूत् ॥ ९२ ॥

yō rasaḥa । sō (a)pām ।

an’tarata[hk]’ kūr’mam’ bhūtagm’ sar’pan’tam ।

tamab’ravī-te ।

mama vait’vaṅ’māgm’sā । samabhū-te ॥ 92 ॥

[१-२३-४] [1-23-4]

नेत्यब्रवीत् । पूर्वमेवाहमिहासमिति । तत्पुरुषस्य पुरुषत्वम् ।

nēt’yab’ravī-te । pūr’vamēvāhamihāsamiti ।

tat’puruṣhas’ya puruṣhat’vam ।

स सहस्रशीर्षा पुरुषः । सहस्राक्षस्सहस्रपात् । भूत्वोदतिष्ठत् ।

sa sahas’raśhīr’ṣhā puruṣhaḥa ।

sahas’rāk’ṣhas’sahas’rapā-te । bhūt’vōdatiṣh’ṭhate ।

तमब्रवीत् । त्वं वै पूर्वँ समभूः ।

tamab’ravī-te । tvaṁ’ vai pūr’vagm’ samabhū-ḥu ।

त्वमिदं पूर्वः कुरुष्वेति । स , इत , आदायापः ॥ ९३ ॥

tvamidam’ pūr’va[hk]’ kuruṣh’vēti ।

sa , ita , ādāyāpaḥa ॥ 93 ॥

[१-२३-५] [1-23-5]

अञ्जलिना पुरस्तादुपादधात् । एवाह्येवेति ।

añ’jalinā puras’tādupādadhā-te । ēvāh’yēvēti ।



www.sanskritdocuments.org www.vedavishwa.com

ततं , आदित्य , उदंतिष्ठत् । सा प्राची दिक् ।

tata , ādit'ya , udatiṣh'ṭhate । sāp' prāchī dike ।

अथांरुणः केतुर्दक्षिणत , उपादंधात् । एवाह्यग्न , इतिं ।

athāruṇa[hk]' kētur'dak'ṣhiṇata , upādadhā-te ।

ēvāh'yag'na , iti ।

ततो वा , अग्निरुदंतिष्ठत् । सा दंक्षिणा दिक् ।

tatō vā , ag'nirudatiṣh'ṭhate । sā dak'ṣhiṇā dike ।

अथांरुणः केतुः पश्चादुपादंधात् । एवाहि वायो , इतिं ॥ ९४ ॥

athāruṇa[hk]' kētu[fp]' paśh'chādupādadhā-te ।

ēvāhi vāyō , iti ॥ 94 ॥

[१-२३-६] [1-23-6]

ततों वायुरुदंतिष्ठत् । सा प्रतीची दिक् ।

tatō vāyurudatiṣh'ṭhate । sāp' pratīchī dike ।

अथांरुणः केतुरुंत्तरत , उपादंधात् । एवाहीन्द्रेतिं ।

athāruṇa[hk]' kēturut'tarata , upādadhā-te ।

ēvāhīn'drēti ।

ततो वा , इन्द्र , उदंतिष्ठत् । सोदींची दिक् ।

tatō vā , in'dra , udatiṣh'ṭhate । sōdīchī dike ।

अथांरुणः केतुर्मध्यं , उपादंधात् । एवाहि पूषन्निति ।

athāruṇa[hk]' kētur'madh'ya , upādadhā-te ।

ēvāhi pūṣhan'niti ।

ततो वै पूषोदंतिष्ठत् । सेयन्दिक् ॥ ९५ ॥

tatō vai pūṣhōdatiṣh'ṭhate । sēyan'dike ॥ 95 ॥



www.sanvedanet.com www.vedavishwa.com

[१-२३-७] [1-23-7]

अथारुणः केतुरुपरिष्टादुपादधात् । एवाहि देवा , इति ।

athāruṇa[hk]’ kēturupariṣh’ṭādupādadhā-te ।

ēvāhi dēvā , iti ।

ततो देवमनुष्याः पितरः । गन्धर्वाप्सरसश्चोदतिष्ठन् ।

tatō dēvamanuṣh’yā[fp]’ pitaraḥa ।

gan’dhar’vāp’sarasaśh’chōdatiṣh’ṭhan’ne ।

सोर्ध्वा दिक् । या विप्रुषो विपरापतन् ।

sōrdh’vā dike । yā vip’ruṣhō viparāpatan’ne ।

ताभ्योऽसुरा रक्षाꣳसि पिशाचाश्चोदतिष्ठन् । तस्मात्ते पराभवन् ।

tābh’yō (a)surā rak’ṣhāgm’si

piśhāchāśh’chōdatiṣh’ṭhan’ne ।

tas’māt’tē parābhavan’ne ।

विप्रुड्भ्यो हि ते समभवन् । तदेषाऽभ्यनूक्ता ॥ ९६ ॥

vip’ruḍ’bhyō hi tē samabhavan’ne ।

tadēṣhā (a)bh’yanūūk’tā ॥ 96 ॥

[१-२३-८] [1-23-8]

आपो ह यद्बृहतीर्गर्भमायन् । दक्षन्दधाना जनयन्तीस्स्वयंभुम् ।

āpō ha yad’br̥hatīr’gar’bhamāyan’ne ।

dak’ṣhan’dadhānā janayan’tīs’svayam’bhum ।

तत , इमेऽध्यसृज्यन्त सर्गाः । अद्भ्यो वा , इदꣳ समभूत् ।

tata , imē (a)d’dhyasr̥j’yan’ta sar’gāāḥa ।

ad’bhyō vā , idagm’ samabhū-te ।

तस्मा॑दि॒दꣳ सर्वँ॒ ब्रम्ह॑ स्वयं॒भ्विति॑ ।
तस्मा॑दि॒दꣳ सर्व॒ꣳ॒ शिथि॒लमि॒वाद्ध्रु॒वमि॑वाभवत् ।
tas'mādidagm' sar'vam' bram'has' svayam'bhviti ।
tas'mādidagm' sar'vagm'
śhithilamivād'dhruvamivābhavate ।
प्र॒जाप॑ति॒र्वाव तत् । आ॒त्मना॒त्मानं॑ वि॒धाय॑ ।
prajāpatir'vāva tate । āt'manāt'mānam' vidhāya ।
तदे॒वानु॒प्रावि॑शत् । तदे॒षाऽभ्यनू॒॑क्ता ॥ ९७ ॥
tadēvānup'rāviśhate । tadēṣhā (a)bh'yanūūk'tā ॥ 97 ॥
[१-२३-९]   [1-23-9]
वि॒धाय॑ लो॒कान्-न्वि॒धाय॑ भू॒तानि॑ । वि॒धाय॒ सर्वा॑ः प्र॒दिशो॒ दिश॑श्च ।
vidhāya lōkāne vidhāya bhūtāni ।
vidhāya sar'vāā[fp]' pradiśhō diśhaśh'cha ।
प्र॒जाप॑तिः प्रथम॒जा , ऋ॒तस्य॑ । आ॒त्मना॒त्मान॑म॒भिसंवि॑वे॒शेति॑ ।
prajāpati[fp]' prathamajā , ṛtas'ya ।
āt'manāt'mānamabhisaṁ'viveśhēti ।
सर्व॑मे॒वेद॒माप्त्वा । सर्व॑मवरु॒ध्य॑ । तदे॒वानु॒प्रवि॑शति । य , ए॒वं वेद॑ ॥ ९८ ॥
sar'vamēvēdamāp'tvā । sar'vamavarud'dhya ।
tadēvānup'raviśhati । ya , ēvaṁ' vēda ॥ 98 ॥
[१-२४-१]   [1-24-1]
च॒तु॒ष्टय्य॒ , आपो॑ गृ॒ण्हाति॒ । च॒त्वारि॒ वा , अ॒पाꣳ रू॒पाणि॑ ।
chatuṣh'ṭay'ya , āpō gṛṇ'hāti ।
chat'vāri vā , apāgm' rūpāṇi ।



www.sriVedaVishwa.com

मेघौं विद्युत् । स्तनयित्नुर्वृष्टिः । तान्येवावरुन्धे । आतपति वर्ष्यां गृण्हाति ।

mēghō vid'yute । stanayit'nur'vṛṣh'ṭiḥi ।

tān'yēvāvarun'dhē । ātapati var'ṣhyā gṛṇ'hāti ।

ताः पुरस्तादुपदधाति । एता वै ब्रम्हवर्चस्या , आपः ।

tā[fp]' puras'tādupadadhāti ।

ētā vaib' bram'havar'chas'yā , āpaḥa ।

मुखत , एव ब्रम्हवर्चसमवरुन्धे । तस्मान्मुखतो ब्रम्हवर्चसितरः ॥ ९९ ॥

mukhata , ēvab' bram'havar'chasamavarun'dhē ।

tas'māān'mukhatōb' bram'havar'chasitaraḥa ॥ 99 ॥

[१-२४-२] [1-24-2]

कूप्या गृण्हाति । ता दक्षिणत , उपदधाति ।

kūp'yā gṛṇ'hāti । tā dak'ṣhiṇata , upadadhāti ।

एता वै तेजस्विनीरापः । तेज , एवास्य दक्षिणतो दधाति ।

ētā vai tējas'vinīrāpaḥa ।

tēja , ēvās'ya dak'ṣhiṇatō dadhāti ।

तस्माद्दक्षिणोऽर्धस्तेजस्वितरः । स्थावरा गृण्हाति ।

tas'mād'dak'ṣhiṇō (a)r'dhas'tējas'vitaraḥa ।

sthāvarā gṛṇ'hāti ।

ताः पश्चादुपदधाति । प्रतिष्ठिता वै स्थावराः ।

tā[fp]' paśh'chādupadadhāti ।

pratiṣh'ṭhitā vais' sthāvarā-ḥa ।

पश्चादेव प्रतितिष्ठति । वहन्तीर्गृण्हाति ॥ १०० ॥

paśh'chādēvap' pratitiṣh'ṭhati ।

vahan'tīr'gṛṇ'hāti ॥ 100 ॥

www.sriveda-vidya.com

[१-२४-३]   [1-24-3]

ता , उत्तरत , उपदधाति ।

ओजसा वा , एता वहन्तीरिवोद्गतीरिव , आकूजतीरिव धावन्तीः ।

tā , ut’tarata , upadadhāti |

ōjasā vā , ētā vahan’tīrivōd’gatīriva ,

ākūjatīriva dhāvan’tī-ḥi |

ओजं , एवास्योत्तरतो दधाति । तस्मादुत्तरोऽर्धं , ओजस्वितरः ।

ōja , ēvās’yōōt’taratō dadhāti |

tas’mādut’tarō (a)r’dha , ōjas’vitaraḥa |

संभार्या गृण्हाति । ता मध्य , उपदधाति ।

sam’bhār’yā gr̥n’hāti | tā madh’ya , upadadhāti |

इयं वै संभार्याः । अस्यामेव प्रतितिष्ठति ।

iyaṁ’ vai sam’bhār’yā-ḥa | as’yāmēvap’ pratitiṣh’ṭhati |

पल्वल्या गृण्हाति । ता , उपरिष्टादुपादधाति ॥ १०१ ॥

pal’val’yā gr̥n’hāti | tā , upariṣh’ṭādupādadhāti || 101 ||

[१-२४-४]   [1-24-4]

असौ वै पल्वल्याः । अमुष्यामेव प्रतितिष्ठति ।

asau vai pal’val’yā-ḥa | amuṣh’yāmēvap’ pratitiṣh’ṭhati |

दिक्षूपदधाति । दिक्षु वा , आपः ।

dik’ṣhūpadadhāti | dik’ṣhu vā , āpaḥa |

अन्नं वा , आपः । अद्भ्यो वा , अन्नञ्जायते ।

an’naṁ’ vā , āpaḥa | ad’bhyō vā , an’nañ’jāyatē |

यदेवाद्भ्योऽन्नञ्जायते । तदवरुन्धे ।

yadēvād’bhyō (a)n’nañ’jāyatē | tadavarun’dhē |



www.sanvedavishwa.com

तं वा , एतमरुणाः केतवो वातरशना , ऋषयोऽचिन्वन् ।
तस्मादारुणकेतुकः ॥ १०२ ॥

taṁ’ vā , ētamaruṇā[hk]’ kētavō vātaraśhanā , ṛṣhayō (a)chin’van’ne ।
tas’mādāruṇakētukaḥa ॥ 102 ॥

[१-२४-५] [1-24-5]

तदेषाऽभ्यनूक्ता । केतवो , अरुणासश्च ।

tadēṣhā (a)bh’yanūūk’tā । kētavō , aruṇāsaśh’cha ।

ऋषयो वातरशनाः । प्रतिष्ठाꣳ शतधाहि ।

ṛṣhayō vātaraśhanā-ḥa । pratiṣh’ṭhāgm’ śhatadhāhi ।

समाहितासो सहस्रधायसमिति । शतशश्चैव सहस्रशश्च प्रतितिष्ठति ।

samāhitāsō sahas’radhāyasamiti ।
śhataśhaśh’chaiva sahas’raśhaśh’chap’ pratitiṣh’ṭhati ।

य , एतमग्निञ्चिनुते । य , उचैनमेवं वेद ॥ १०३ ॥

ya , ētamag’niñ’chinutē । ya , uchainamēvaṁ’ vēda ॥ 103 ॥

[१-२५-१] [1-25-1]

जानुदघ्नीमुत्तरवेदीङ्खात्वा । अपां पूरयति ।

jānudagh’nīmut’taravēdīṅ’khāt’vā । apām’ pūrayati ।

अपाꣳ सर्वत्वाय । पुष्करपर्णꣳ रुक्मं पुरुषमित्युपदधाति ।

apāgm’ sar’vat’vāya ।
puṣh’karapar’ṇagm’ ruk’mam’ puruṣhamit’yupadadhāti ।

तपो वै पुष्करपर्णम् । सत्यꣳ रुक्मः ।

tapō vai puṣh’karapar’ṇam । sat’yagm’ ruk’maḥa ।

अमृतं पुरुषः । एतावद्वावाँस्ति । यावदेतत् । यावदेवास्ति ॥ १०४ ॥

amṛtam' puruṣhaḥa | ētāvad'vāvāās'ti |

yāvadētate | yāvadēvās'ti || 104 ||

[१-२५-२] [1-25-2]

तदवरुन्धे । कूर्ममुपदधाति ।

tadavarun'dhē | kūr'mamupadadhāti |

अपामेव मेधमवरुन्धे । अथोँ स्वर्गस्य लोकस्य समष्ट्यै ।

apāmēva mēdhamavarun'dhē |

athōōs' svar'gas'ya lōkas'ya samaṣh'ṭyai |

आपमापामपस्सर्वाँः । अस्मादस्मादितोऽमुतः ।

āpamāpāmapas'sar'vāāḥa | as'mādas'māditō (a)mutaḥa |

अग्निर्वायुश्च सूर्यश्च । सहसञ्चस्करर्द्धिया , इति ।

ag'nir'vāyuśh'cha sūr'yaśh'cha |

sahasañ'chas'karard'dhiyā , iti |

वाय्वश्वा रश्मिपतयः । लोकं पृणच्छिद्रं पृण ॥ १०५ ॥

vāy'vaśh'vā raśh'mipatayaḥa |

lōkam' pṛṇat'chhid'ram' pṛṇa || 105 ||

[१-२५-३] [1-25-3]

यास्तिस्रः परमजाः । इन्द्रघोषा वो वसुभिरेवाह्येवेति ।

yās'tis'ra[fp]' paramajā-ḥa |

in'draghōṣhā vō vasubhirēvāh'yēvēti |

पञ्चचितय , उपदधाति । पाङ्क्तोऽग्निः । यावानेवाग्निः । तञ्चिनुते ।

pañ'chachitaya , upadadhāti | pāṅ'ktō (a)g'niḥi |

yāvānēvāg'niḥi | tañ'chinutē |



www.sailvedaviswa.com

लोकंपृणया द्वितीयामुपंदधाति । पञ्चंपदा वै विराट् ।

lōkam'pṛṇayād' dvitīyāmupadadhāti ।

pañ'chapadā vai virā-ṭe ।

तस्या वा , इयं पादः । अन्तरिंक्षं पादः । द्यौः पादः । दिशः पादः ।

tas'yā vā , iyam' pādaḥa । an'tarik'sham' pādaḥa ।

dyau[fp]' pādaḥa । diśha[fp]' pādaḥa ।

परोरंजाः पादः । विराज्येव प्रतितिष्ठति ।

parōrajā[fp]' pādaḥa । virāj'yēvap' pratitiṣh'ṭhati ।

य , एतमग्निञ्चिनुते । य , उ चैनमेवं वेदं ॥ १०६ ॥

ya , ētamag'niñ'chinutē । ya , u chainamēvaṁ' vēda ॥ 106 ॥

[१-२६-१] [1-26-1]

अग्निं प्रणीयोपसमाधाय । तमभितं , एता , अबीष्टका , उपंदधाति ।

ag'nim' praṇīyōpasamādhāya ।

tamabhita , ētā , abīṣh'ṭakā , upadadhāti ।

अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु ।

ag'nihōt'rē dar'śhapūr'ṇamāsayōōḥo ।

paśhuban'dhē chātur'mās'yēṣhu ।

अथो , आहुः । सर्वेषु यज्ञक्रतुष्विति ।

athō , āhuḥu । sar'vēṣhu yaj'ñak'ratuṣh'viti ।

अथ हस्माहारुणस्स्वायंभुवः । सावित्रस्सर्वोऽग्निरित्यनंनुषङ्गं मन्यामहे ।

atha has'māhāruṇas'svāyam'bhuvaḥa ।

sāvit'ras'sar'vō (a)g'nirit'yananuṣhaṁ'gam' man'yāmahē ।

नाना वा , एतेषां वीर्याणि । कमग्निञ्चिनुते ॥ १०७ ॥

nānā vā , ētēṣhāṁ' vīr'yāṇi । kamag'niñ'chinutē ॥ 107 ॥

[१-२६-२]   [1-26-2]

स॒त्रियम॒ग्निश्चि॑न्वा॒नः । कम॒ग्निश्चि॑नुते ।

sat'riyamag'niñ'chin'vānaḥa I kamag'niñ'chinutē I

सा॒वि॒त्रम॒ग्निश्चि॑न्वा॒नः । कम॒ग्निश्चि॑नुते ।

sāvit'ramag'niñ'chin'vānaḥa I kamag'niñ'chinutē I

ना॒चि॒के॒तम॒ग्निश्चि॑न्वा॒नः । कम॒ग्निश्चि॑नुते ।

nāchikētamag'niñ'chin'vānaḥa I kamag'niñ'chinutē I

चा॒तु॒र्हो॒त्रियम॒ग्निश्चि॑न्वा॒नः । कम॒ग्निश्चि॑नुते ।

chātur'hōt'riyamag'niñ'chin'vānaḥa I kamag'niñ'chinutē I

वै॒श्व॒सृ॒जम॒ग्निश्चि॑न्वा॒नः । कम॒ग्निश् चि॑नुते ॥ १०८ ॥

vaiśh'vasṛjamag'niñ'chin'vānaḥa I

kamag'niñ' chinutē II 108 II

[१-२६-३]   [1-26-3]

उ॒पा॒नु॒वा॒क्यमा॒शुम॒ग्निश्चि॑न्वा॒नः । कम॒ग्निश्चि॑नुते ।

upānuvāk'yamāśhumag'niñ'chin'vānaḥa I

kamag'niñ'chinutē I

इ॒मम॑रुणकेतुकम॒ग्निश्चि॑न्वा॒न , इति॑ । वृषा॒ वा , अ॒ग्निः ।

imamāruṇakētukamag'niñ'chin'vāna , iti I

vṛṣhā vā , ag'niḥi I

वृषा॑णौ सङ्स्फा॑लयेत् । ह॒न्येता॑स्य य॒ज्ञः ।

vṛṣhāṇau sag'ges'phālayē-te I han'yētāās'ya yaj'ñaḥa I

तस्मा॒न्नानु॒षज्यः॑ । सोत्त॑रवे॒दिषु॒ क्र॒तुषु॒ चिन्वीत ।

tas'mān'nānuṣhaj'yaḥa I

sōt'taravēdiṣhuk' kratuṣhu chin'vīta I

www.stivedavishwa.com

उत्तरवेद्याꣳ ह्यग्निश्चीयते । प्रजाकामश्चिन्वीत ॥ १०९ ॥

ut'taravēd'yāgeh' hyag'niśh'chīyatēē |
prajākāmaśh'chin'vīta || 109 ||
[१-२६-४] [1-26-4]

प्राजापत्यो वा , एषोऽग्निः । प्राजापत्याः प्रजाः ।

prājāpat'yō vā , ēṣhōō (a)g'niḥi | prājāpat'yā[fp]' prajā-ḥa |

प्रजावान्भवति । य , एवं वेद ।

prajāvāān'bhavati | ya , ēvaṁ' vēda |

पशुकामश्चिन्वीत । संज्ञानं वा , एतत्पशूनाम् ।

paśhukāmaśh'chin'vīta | sañ'jñānaṁ' vā , ētat'paśhūnām |

यदापः । पशूनामेव संज्ञानेऽग्निश्चिनुते ।

yadāpaḥa | paśhūnāmēva sañ'jñānē (a)g'niñ'chinutē |

पशुमान्भवति । य , एवं वेद ॥ ११० ॥

paśhumān'bhavati | ya , ēvaṁ' vēda || 110 ||
[१-२६-५] [1-26-5]

वृष्टिकामश्चिन्वीत । आपो वै वृष्टिः । पर्जन्यो वर्षुको भवति ।

vṛṣh'ṭikāmaśh'chin'vīta | āpō vai vṛṣh'ṭiḥi |
par'jan'yō var'ṣhukō bhavati |

य , एवं वेद । आमयावी चिन्वीत । आपो वै भेषजम् ।

ya , ēvaṁ' vēda | āmayāvī chin'vīta | āpō vai bhēṣhajam |

भेषजमेवास्मै करोति । सर्वमायुरेति ।

bhēṣhajamēvās'mai karōti | sar'vamāyurēti |

अभिचरꣳश्चिन्वीत । वज्रो वा , आपः ॥ १११ ॥

abhicharag'geśh'chin'vīta | vaj'rō vā , āpaḥa || 111 ||

[१-२६-६] [1-26-6]

वज्रमेव भ्रातृव्येभ्यः प्रहरति । स्तृणुत , एनम् ।

vaj'ramēvab' bhrātṛv'yēbh'ya[fp]' praharati ।

stṛṇuta , ēnam ।

तेजस्कामो यशस्कामः । ब्रम्हवर्चसकामस्स्वर्गकामश्चिन्वीत ।

tējas'kāmō yaśhas'kāmaḥa ।

bram'havar'chasakāmas'svar'gakāmaśh'chin'vīta ।

एतावद्वा वाँस्ति । यावदेतत् । यावदेवास्ति । तदवरुन्धे ।

ētāvad'vā vāās'ti । yāvadētate ।

yāvadēvās'ti । tadavarun'dhē ।

तस्यैतद्व्रतम् । वर्षति न धावेत् ॥ ११२ ॥

tas'yaitad'vratam । var'ṣhati na dhāvē-te ॥ 112 ॥

[१-२६-७] [1-26-7]

अमृतं वा , आपः । अमृतस्यानन्तरित्यै । नाप्सु मूत्रपुरीषङ्कुर्यात् ।

न निष्ठीवेत् । न विवसनस्स्नायात् । गुह्यो वा , एषोऽग्निः ।

amṛtaṁ' vā , āpaḥa । amṛtas'yānan'tarit'yai ।

nāp'su mūt'rapurīṣhaṅ'kur'yā-te । na niṣh'ṭhīvē-te ।

na vivasanas'snāyā-te । guh'yō vā , ēṣhōō (a)g'niḥi ।

एतस्याग्नेरनतिदाहाय । न पुष्करपर्णानि हिरण्यं वाऽधितिष्ठेत् ।

ētas'yāg'nēranatidāhāya ।

na puṣh'karapar'ṇāni hiraṇ'yaṁ' vā (a)dhitiṣh'ṭhēēte ।

एतस्याग्नेरनभ्यारोहाय । न कूर्मस्याश्नीयात् ।

ētas'yāg'nēranabh'yārōhāya । na kūr'mas'yāśh'nīyā-te ।



www.sanskritvedavishwa.com

नोदकस्याघातुकान्येनमोदकानि भवन्ति । अघातुका , आपः ।
nōdakas’yāghātukān’yēnamōdakāni bhavan’ti |
aghātukā , āpaḥa |
य , एतमग्निञ्चिनुते । य , उचैनमेवं वेद ॥ ११३ ॥
ya , ētamag’niñ’chinutē | ya , uchainamēvaṁ’ vēda || 113 ||
[१-२७-१] [1-27-1]
इमानुकं भुवना सीषधेम । इन्द्रश्च विश्वे च देवाः ।
imānukam’ bhuvanā sīṣhadhēma |
in’draśh’cha viśh’vē cha dēvā-ḥa |
यज्ञञ्च नस्तन्वञ्च प्रजाञ्च । आदित्यैरिन्द्रस्सह सीषधातु ।
yaj’ñañ’cha nas’tan’vañ’chap’ prajāñ’cha |
ādit’yairin’dras’saha sīṣhadhātu |
आदित्यैरिन्द्रस्सगणो मरुद्भिः । अस्माकं भूत्वविता तनूनाम् ।
ādit’yairin’dras’sagaṇō marud’bhiḥi |
as’mākam’ bhūt’vavitā tanūnāām |
आप्लवस्व प्रप्लवस्व । आण्डी भव ज मा मुहुः ।
āp’lavas’vap’ prap’lavas’va | āṇ’ḍī bhava ja mā muhuḥu |
सुखादीन्दुःखनिधनाम् । प्रतिमुञ्चस्व स्वां पुरम् ॥ ११४ ॥
sukhādīn’du[hk]’khanidhanām |
pratimuñ’chas’vas’ svām’ puram || 114 ||
[१-२७-२] [1-27-2]
मरीचयस्स्वायंभुवाः । ये शरीराण्यकल्पयन् ।
marīchayas’svāyam’bhuvā-ḥa |
yē śharīrāṇ’yakal’payan’ne |

www.sanskritweb.net / www.vedavishwa.com

ते ते देहङ्कल्पयन्तु । मा च ते ख्या स्म तीरिषत् ।

tē tē dēhaṅ’kal’payan’tu ।

mā cha tēk’ khyās’ sma tīriṣhate ।

उत्तिष्ठत मा स्वप्त । अग्निमिच्छध्वं भारताः ।

ut’tiṣh’ṭhata mās’ svap’ta ।

ag’nimit’chhadh’vam’ bhāratā-ḥa ।

राज्ञस्सोमस्य तृप्तासः । सूर्येण सयुजोषसः ।

rāj’ñas’sōmas’ya tṛp’tāsaḥa । sūr’yēṇa sayujōṣhasaḥa ।

युवा सुवासाः । अष्टाचक्रा नवद्वारा ॥ ११५ ॥

yuvā suvāsāāḥa । aṣh’ṭāchak’rā navad’vārā ॥ 115 ॥

[१-२७-३] [1-27-3]

देवानां पूरयोध्या । तस्याꣳ हिरण्मयः कोशः ।

dēvānām’ pūrayōdh’yā ।

tas’yāgm’ hiraṇ’maya[hk]’ kōśhaḥa ।

स्वर्गो लोको ज्योतिषाऽऽवृतः । यो वै तां ब्रम्हणो वेद ।

svar’gō lōkōj’ jyōtiṣhā (ā)vṛtaḥa ।

yō vai tāām’ bram’haṇō vēda ।

अमृतेनाऽऽवृतां पुरीम् । तस्मै ब्रम्ह च ब्रम्हा च ।

amṛtēnā (ā)vṛtām’ purīm ।

tas’maiīb’ bram’ha chab’ bram’hā cha ।

आयुः कीर्तिं प्रजान्ददुः । विभ्राजमानाꣳ हरिणीम् ।

āyu[hk]’ kīr’tim’ prajān’daduḥu ।

vibh’rājamānāgm’ hariṇīm ।

यशसा संपरीवृताम् । पुरꣳ हिरण्मयीं ब्रम्हा ॥ ११६ ॥

yaśhasā sam'parīvṛtām ।
puragm' hiraṇ'mayīm' bram'hā ॥ 116 ॥
[१-२७-४] [1-27-4]

विवेशाऽपराजिता । पराङेत्यंज्यामयी । पराङेत्यंनाशकी ।
इह चामुत्र चान्वेति । विद्वान्देवासुरानुभयान् । यत्कुमारी मन्द्रयते ।

vivēśhā (a)parājitā । parāṅēt'yaj'yāmayī ।
parāṅēt'yanāśhakī । iha chāmut'ra chān'vēti ।
vid'vān'dēvāsurānubhayā-ne । yat'kumārī man'drayatē ।

यद्योषिद्यत्पतिव्रता । अरिष्टं यत्किञ्च क्रियते ।

yad'yōṣhid'yat'pativ'ratāā ।
ariṣh'tañ' yat'kiñ'chak' kriyatēē ।

अग्निस्तदनुवेधति । अश्रुतासश्श्रुतासश्च ॥ ११७ ॥

ag'nis'tadanuvēdhati । aśhṛtāsaśh'śhṛtāsaśh'cha ॥ 117 ॥
[१-२७-५] [1-27-5]

यज्वानो येऽप्ययज्वनः । स्वर्यन्तो नापेक्षन्ते ।

yaj'vānō yē (a)p'yayaj'vanaḥa ।
svar'yan'tō nāpēēk'ṣhan'tē ।

इन्द्रमग्निञ्च ये विदुः । सिकता , इव संयन्ति ।

in'dramag'niñ'cha yē viduḥu । sikatā , iva sañ'yan'ti ।

रश्मिभिस्समुदीरिताः । अस्माल्लोकादमुष्माच्च ।

raśh'mibhis'samudīritā-ḥa । as'māl'lōkādamuṣh'māt'cha ।

ऋषिभिरदात्पृश्निभिः । अपेत वीत वि च सर्पतातः ।

ṛṣhibhiradāt'pṛśh'nibhiḥi । apēta vīta vi cha sar'patātaḥa ।



www.vedavishwa.com www.sai vedant.net

येऽत्र स्थ पुराणा ये च नूतनाः । अहोभिरद्भिरक्तुभिर्व्यक्तम् ॥ ११८ ॥

yē (a)t'ras' stha purāṇā yē cha nūtanā-ḥa ।

ahōbhirad'bhirak'tubhir'vyak'tam ॥ 118 ॥

[१-२७-६] [1-27-6]

यमो ददात्ववसानमस्मै । नृ मुणन्तु नृ पात्वर्यः ।

yamō dadāt'vavasānamas'mai ।

nṛ muṇan'tu nṛ pāt'var'yaḥa ।

अकृष्टा ये च कृष्टजाः । कुमारीषु कनीनीषु ।

akṛsh'ṭā yē cha kṛsh'ṭajā-ḥa । kumārīṣhu kanīnīṣhu ।

जारिणीषु च ये हिताः । रेतःपीता , आण्डपीताः ।

jāriṇīṣhu cha yē hitā-ḥa । rēta[fp]'pītā , āṇ'ḍapītā-ḥa ।

अङ्गारेषु च ये हुताः । उभयान्पुत्रपौत्रकान् ।

aṅ'gārēṣhu cha yē hutā-ḥa । ubhayāan'put'rapaut'rakā-ne ।

युवेऽहं यमराजगान् । शतमिन्नु शरदः ॥ ११९ ॥

yuvē (a)hañ' yamarājagā-ne ।

śhatamin'nu śharadaḥa ॥ 119 ॥

[१-२७-७] [1-27-7]

अदो यद्ब्रम्ह विलबम् । पितृणाञ्च यमस्य च । वरुणस्याश्विनोरग्नेः ।

मरुताञ्च विहायसाम् । कामप्रयवणं मे , अस्तु । स ह्येवास्मि सनातनः ।

adō yad'bram'ha vilabam । pitṛṇāñ'cha yamas'ya cha ।

varuṇas'yāśh'vinōrag'nē-ḥē । marutāañ'cha vihāyasām ।

kāmap'rayavaṇam' mē , as'tu ।

sah' hyēvās'mi sanātanaḥa ।

इति नाकोब्रम्हिश्रवो रायो धनम् । पुत्रानापो देवीरिहाहिता ॥ १२० ॥
iti nākōb' bram'hiśh'ravō rāyō dhanam I
put'rānāpō dēvīrihāhitā II 120 II
[१-२८-१] [1-28-1]
विशीर्ष्णीं गृध्रशीर्ष्णीञ्च । अपेतो निर्ऋतिꣳ हथः ।
viśhīir'ṣhṇīṅ' gṛdh'raśhīr'ṣhṇīñ'cha I
apētō nir'ṛtigm' hathaḥa I
परिबाधꣴ श्वेतकुक्षम् । निजङ्घꣳ शबलोदरम् ।
paribādhag'geśh' śhvētakuk'ṣham I
nijaṅ'ghagm' śhabalōdaram I
स तान्-वाच्यायया सह । अग्ने नाशय संदृशः ।
sa tā-nevāch'yāyayā saha I ag'nē nāśhaya san'dṛśhaḥa I
ईर्ष्यासूये बुभुक्षाम् । मन्युं कृत्याञ्च दीधिरे ।
īr'ṣhyāsūyē bubhuk'ṣhām I
man'yuṅ' kṛt'yāñ'cha dīdhirē I
रथेन किꣳशुकावता । अग्ने नाशय संदृशः ॥ १२१ ॥
rathēna kigm'śhukāvatā I
ag'nē nāśhaya san'dṛśhaḥa II 121 II
[१-२९-१] [1-29-1]
पर्जन्याय प्रगायत । दिवस्पुत्राय मीढुषे ।
par'jan'yāyap' pragāyata I divas'put'rāya mīḍhuṣhēē I
स नो यवसमिच्छतु । इदं वचः पर्जन्याय स्वराजे ।
sa nō yavasamit'chhatu I
idaṁ' vacha[fp]' par'jan'yāyas' svarājēē I

हृदो , अस्त्वन्तरन्तद्युयोत । मयोभूर्वातो विश्वकृष्टयस्सन्त्वस्मे ।
hṛdō , as’tvan’taran’tad’yuyōta ।
mayōbhūr’vātō viśh’vakṛṣh’ṭayas’san’tvas’mē ।
सुपिप्पला , ओषधीर्देवगोपाः । यो गर्भमोषधीनाम् ।
supip’palā , ōṣhadhīr’dēvagōpā-ḥa ।
yō gar’bhamōṣhadhīnām ।
गवाङ्कृणोत्यर्वताम् । पर्जन्यः पुरुषीणाम् ॥ १२२ ॥
gavāāṅ’kṛṇōt’yar’vatām ।
par’jan’ya[fp]’ puruṣhīṇāām ॥ 122 ॥
[१-३०-१] [1-30-1]
पुनर्मामैत्विन्द्रियम् । पुनरायुः पुनर्भगः ।
punar’māmait’vin’driyam ।
punarāyu[fp]’ punar’bhagaḥa ।
पुनर्ब्राम्हणमैतु मा । पुनर्द्रविणमैतु मा ।
punar’brām’haṇamaitu mā । punar’draviṇamaitu mā ।
यन्मेऽद्य रेतः पृथिवीमस्कान् । यदोषधीरप्यसरद्यदापः ।
yan’mē (a)d’ya rēta[fp]’ pṛthivīmas’kāne ।
yadōṣhadhīrap’yasarad’yadāpaḥa ।
इदन्तत्पुनराददे । दीर्घायुत्त्वाय वर्चसे ।
idan’tat’punarādadē । dīr’ghāyut’tvāya var’chasē ।
यन्मे रेतः प्रसिच्यते । यन्म , आजायते पुनः ।
yan’mē rēta[fp]’ prasich’yatē । yan’ma , ājāyatē punaḥa ।
तेन माममृतङ्कुरु । तेन सुप्रजसङ्कुरु ॥ १२३ ॥
tēna māmamṛtaṅ’kuru । tēna sup’rajasaṅ’kuru ॥ 123 ॥


www.sanatanvedavishwa.com

[१-३१-१] [1-31-1]

अद्भ्यस्तिरोधाऽजायत । तव वैश्रवणस्सदा ।

ad'bhyas'tirōdhā (a)jāyata | tava vaiśh'ravaṇas'sadā |

तिरोधेहि सपत्नान्नः । ये , अपोऽश्नन्ति केचन ।

tirōdhēhi sapat'nān'naḥa | yē , apō (a)śh'nan'ti kēchana |

त्वाष्ट्रीं मायां वैश्रवणः । रथꣳ सहस्रवन्धुरम् ।

tvāṣh'ṭrīm' māyām' vaiīśh'ravaṇaha |
rathagm' sahas'ravan'dhuram |

पुरुश्चक्रꣳ सहस्राश्वम् । आस्थायायाहि नो बलिम् ।

puruśh'chak'ragm' sahas'rāśh'vam |
ās'thāyāyāhi nō balim |

यस्मै भूतानि बलिमावहन्ति । धनङ्गावो हस्तिहिरण्यमश्वान् ॥ १२४ ॥

yas'mai bhūtāni balimāvahan'ti |
dhanan'gāvō has'tihiraṇ'yamaśh'vāne || 124 ||

[१-३१-२] [1-31-2]

असाम सुमतौ यज्ञियस्य । श्रियं बिभ्रतोऽन्नमुखीं विराजम् ।

asāma sumatau yaj'ñiyas'ya |
śhriyam' bibh'ratō (a)n'namukhīm' virājam'm |

सुदर्शने च क्रौञ्चे च । मैनागे च महागिरौ ।

sudar'śhanē chak' krauñ'chē cha |
maināgē cha mahāgirau |

शतद्वाट्टारगमन्ता । सꣳहार्यन्नगरं तव । इति मन्त्राः । कल्पोऽत , ऊर्ध्वम् ।

śhatad'vāṭ'ṭāragaman'tā | sagm'hār'yan'nagaran' tava |
iti man'trāḥa | kal'pō (a)ta , ūrdh'vam |

www.saivedavishwa.com

यदि बलिꣳ हरे॑त् । हिरण्यनाभये वितुदये कौबेरायायं बलिः ॥ १२५ ॥
yadi baligm' harēēte ।
hiraṇ'yanābhayē vitudayē
kaubērāyāyam' balihi ॥ 125 ॥
[१-३१-३] [1-31-3]
सर्वभूताधिपतये नम , इति । अथ बलिꣳ हृत्वोपतिष्ठेत ।
sar'vabhūtādhipatayē nama , iti ।
atha baligm' hṛt'vōpatiṣh'ṭhēta ।
क्षत्त्रं क्षत्त्रं वैश्रवणः । ब्राम्हणा वयꣳस्मः ।
kṣhat'traṁ' kṣhat'traṁ' vaiśh'ravaṇaḥa ।
brām'haṇā vayag'ges'maḥa ।
नमस्ते , अस्तु मा मा हिꣳसीः । अस्मात्प्रविश्यान्नमद्धीति ।
namas'tē , as'tu mā mā higm'sī-ḥi ।
as'māt'praviśh'yān'namad'dhīti ।
अथ तमग्निमादधीत । यस्मिन्नेतत्कर्म प्रयुञ्जीत ।
atha tamag'nimādadhīta ।
yas'min'nētat'kar'map' prayuñ'jīta ।
तिरोधा भूः । तिरोधा भुवः ॥ १२६ ॥
tirōdhā bhū-ḥu । tirōdhā bhuvaḥa ॥ 126 ॥
[१-३१-४] [1-31-4]
तिरोधास्स्वः । तिरोधा भूर्भुवस्स्वः ।
tirōdhās'svaḥa । tirōdhā bhūr'bhuvas'svaḥa ।
सर्वेषां लोकानामाधिपत्ये सीदेति । अथ तमग्निमिन्धीत ।
sar'vēṣhāṁ' lōkānāmādhipat'yē sīdēti ।
atha tamag'nimin'dhīta ।

यस्मिन्नेतत्कर्म प्रयुञ्जीत । तिरोधा भूस्स्वाहा ।

yas’min’nētat’kar’map’ prayuñ’jīta ।

tirōdhā bhūs’svāhāā ।

तिरोधा भुवस्स्वाहा । तिरोधा स्वस्स्वाहा ।

tirōdhā bhuvas’svāhāā । tirōdhās’ svas’svāhāā ।

तिरोधा भूर्भुवस्स्वस्स्वाहा ।

यस्मिन्नस्य काले सर्वा , आहुतीर्हुता भवेयुः ॥ १२७ ॥

tirōdhā bhūr’bhuvas’svas’svāhāā ।

yas’min’nas’ya kālē sar’vā ,

āhutīr’hutā bhavēyuḥu ॥ 127 ॥

[१-३१-५] [1-31-5]

अपि ब्राम्हणमुखीनाः । तस्मिन्नन्हः काले प्रयुञ्जीत । परस्सुप्तजनाद्वेपि ।

apib’ brām’haṇamukhīnā-ḥa ।

tas’min’nan’ha[hk]’ kālēp’ prayuñ’jīta ।

paras’sup’tajanād’vēpi ।

मास्म प्रमाद्यन्तमाध्यापयेत् । सर्वार्थाः सिद्ध्यन्ते । य , एवं वेद ।

mās’map’ pramād’yan’tamādh’yāpayē-te ।

sar’vār’thāās’ sid’dhyan’tē । ya , ēvaṁ’ vēda ।

क्षुध्यन्निदमजानताम् । सर्वार्था न सिद्ध्यन्ते ।

kṣhudh’yan’nidamajānatām । sar’vār’thā na sid’dhyan’tē ।

यस्ते विघातुको भ्राता । ममान्तर्हृदये श्रितः ॥ १२८ ॥

yas’tē vighātukōb’ bhrātā ।

mamān’tar’hṛdayēśh’ śhritaḥa ॥ 128 ॥

[१-३१-६] [1-31-6]

तस्मा , इममग्रपिण्डञ्जुहोमि । समेॆऽर्थान्मा विवधीत् ।

tas’mā , imamag’rapiṇ’ḍañ’juhōmi |

samēē (a)r’thān’mā vivadhī-te |

मयि स्वाहा । राजाधिराजाय प्रसह्यसाहिने ।

mayis’ svāhāā | rājādhirājāyap’ prasah’yasāhinēē |

नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् ।

namō vayaṁ’ vaiśh’ravaṇāya kur’mahē |

sa mē kāmān’kāmakāmaya mah’yam’m |

कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय ।

kāmēśh’varō vaiśh’ravaṇō dadātu |

kubērāya vaiśh’ravaṇāya |

महाराजाय नमः । केतवो , अरुणासश्च ।

mahārājāya namaḥa | kētavō , aruṇāsaśh’cha |

ऋषयो वातरशनाः । प्रतिष्ठाꣳ शतधा हि ।

ṛṣhayō vātaraśhanā-ḥa | pratiṣh’ṭhāgm’ śhatadhā hi |

समाहितासो सहस्रधायसम् । शिवा नश्शन्तमा भवन्तु ।

samāhitāsō sahas’radhāyasam |

śhivā naśh’śhan’tamā bhavan’tu |

दिव्या , आप , ओषधयः । सुमृडीका सरस्वति ।

div’yā , āpa , ōṣhadhayaḥa | sumṛḍīkā saras’vati |

मा ते व्योम संदृशि ॥ १२९ ॥

mā tēv’ vyōma san’dṛśhi || 129 ||

www.sanskritvedavishwa.com

[१-३२-१] [1-32-1]

संवत्सरमेतद्व्रतञ्चरेत् । द्वौ वा मासौ ।

sam'vat'saramētad'vratañ'charē-te । dvau vā māsau ।

नियमस्समासेन । तस्मिन्नियमविशेषाः ।

niyamas'samāsēna । tas'min'niyamaviśhēṣhā-ḥa ।

त्रिषवणमुदकोपस्पर्शी । चतुर्थकालपानभक्तस्स्यात् ।

triṣhavaṇamudakōpas'par'śhī ।

chatur'thakālapānabhak'tas'syā-te ।

अहरहर्वा भैक्षमश्नीयात् । औदुम्बरीभिः समिद्भिरग्निं परिचरेत् ।

aharahar'vā bhaik'ṣhamaśh'nīyā-te ।

audum'barībhis' samid'bhirag'nim' paricharē-te ।

पुनर्मा मैत्त्विन्द्रियमित्येतेनाऽनुवाकेन ।

उद्धृतपरिपूताभिरद्भिः कार्यङ्कुर्वीत ॥ १३० ॥

punar'mā mait'tvin'driyamit'yētēnā (a)nuvākēna ।

ud'dhṛtaparipūtābhirad'bhi[hk]'

kār'yaṅ'kur'vīta ॥ 130 ॥

[१-३२-२] [1-32-2]

असञ्चयवान् । अग्नये वायवे सूर्याय ।

asañ'chayavā-ne । ag'nayē vāyavē sūr'yāya ।

ब्रम्हणे प्रजापतये । चन्द्रमसे नक्षत्रेभ्यः ।

bram'haṇēp' prajāpatayē ।

chan'dramasē nak'ṣhat'rēbh'yaḥa ।

ऋतुभ्यस्संवत्सराय । वरुणायारुणायेति व्रतहोमाः ।

ṛtubh'yas'sam'vat'sarāya ।

varuṇāyāruṇāyētiv' vratahōmā-ḥa ।



www.sanskritveda.net www.vedavishwa.com

प्रवर्ग्यवदादेशः । अरुणाः काण्ड , ऋषयः ।
pravar’gyavadādēśhaḥa । aruṇā[hk]’ kāāṇ’ḍa , ṛṣhayaḥa ।
अरण्येऽधीयीरन् । भद्रं कर्णेभिरिति द्वे जपित्वा ॥ १३१ ॥
araṇ’yē (a)dhīyīran’ne ।
bhad’raṁ’ kar’ṇēbhiritid’ dvē japit’vā ॥ 131 ॥
[१-३२-३] [1-32-3]
महानाम्नीभिरुदकꣳ सꣳस्पर्श्य । तमाचार्यो दद्यात् ।
mahānām’nībhirudakagm’ sag’ges’par’śhya ।
tamāchāār’yō dad’yā-te ।
शिवा नश्शान्तमेत्योषधीरालभते । सुमृडीकेति भूमिम् ।
śhivā naśh’śhan’tamēt’yōṣhadhīrālabhatē ।
sumṛḍīkēti bhūmim ।
एवमपवर्गे । धेनुर्दक्षिणा । कꣳसं वासश्च क्षौमम् । अन्यद्वाशुक्लम् ।
ēvamapavar’gē । dhēnur’dak’ṣhiṇā ।
kagm’saṁ’ vāsaśh’chak’ kṣhaumam । an’yad’vāśhuk’lam ।
यथाशक्ति वा । एवꣳ स्वाध्यायधर्मेण ।
yathāśhak’ti vā । ēvag’ges’ svād’dhyāyadhar’mēṇa ।
अरण्येऽधीयीत । तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति ॥ १३२ ॥
araṇ’yē (a)dhīyīta ।
tapas’vī puṇ’yō bhavati tapas’vī puṇ’yō bhavati ॥ 132 ॥
भद्रं … ॐ शान्ति शान्ति शान्तिः ॥ (ॐ भद्रं…)
bhad’raṁ’… ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥ (ॐ bhad’raṁ’…)

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥


www.vedavisiwa.com / www.saiveda.net

# Aruṇapraśhnaḥa

## KYV TA Prapāṭhakaḥa 1


Anuvākaḥa 1 Sūkta 1 .......................... 1
Anuvākaḥa 2 Sūkta 4 .......................... 5
Anuvākaḥa 5 Sūkta 1 .......................... 10
Anuvākaḥa 7 Sūkta 3 .......................... 15
Anuvākaḥa 8 Sūkta 6 .......................... 20
Anuvākaḥa 9 Sūkta 6 .......................... 25
Anuvākaḥa 11 Sūkta 1 .......................... 30
Anuvākaḥa 12 Sūkta 2 .......................... 35
Anuvākaḥa 14 Sūkta 2 .......................... 40
Anuvākaḥa 17 Sūkta 2 .......................... 46
Anuvākaḥa 21 Sūkta 1 .......................... 50
Anuvākaḥa 22 Sūkta 6 .......................... 55
Anuvākaḥa 23 Sūkta 4 .......................... 60
Anuvākaḥa 24 Sūkta 3 .......................... 66
Anuvākaḥa 26 Sūkta 4 .......................... 71
Anuvākaḥa 27 Sūkta 6 .......................... 76
Anuvākaḥa 31 Sūkta 4 .......................... 80




**R**oman **C**oloured **C**oding **S**cript


© www.saiveda.net

www.saiveda.net
www.vedavishwa.com